भा. पंचमस्कं. पं. ४१

1

भा०पं०

१

ॐ स्वस्ति श्रीगणेशाय नमः। नमः श्रीमत्परमहंसास्वादितचरणकमलचिन्मकरन्दाय भक्तजनमानसनिवासाय श्रीरामाय। अथातः पञ्चमस्कन्धव्याख्यानेऽकविशेषवान् प्रियव्रतान्वयोपत्रसप्रपंचः प्रपंचते षड्विंशत्याध्यायैः पञ्चमे स्थाननिरूप्यते १ लोकद्वीपादिमर्यादापालनाख्यानमनेकधा ... लोकेऽस्मिन्...विधानतः २ पुनः ...लिखमर्यादाव...ध्यानमना भुवो द्वीपादिमर्यादाः पालिता इति वर्ण्यते ३ भूमेः पृथ्व्यादिकाधस्तन...दिभिः ...शत्या प्रियव्रतपुरः ... ४ भुवो द्वीपादिमर्यादाः पाल्यन्ते राजभिः पृथक् त्रिभिः सूर्यादिभिर्ज्योतिश्चक्रादि ... कीर्त्यते ५ अतलादिकरैस्यादैः पालनं च ... तत्र प्रथमे ध्यायेऽत्र निनोऽस्य निर्वृतिः ६ पुनस्त्र ज्ञाननिष्ठितिः प्रियव्रतकुलाद्युनावशः प्रियव्रतस्यापि निवोधत्यपरं जनम ७ येनारदादात्मविद्यामधिगम्य मेऽतिमं ... विभज्य पुत्रेभ्यो ... स्वरं लमगात्पदमिति दर्शयन् कथान्तेऽस्तं ...

राजोवाच प्रियव्रतो भागवत आत्मारामः कथं मुने गृहेऽरमत यन्मूलः कर्मबंधः पराभवः १ न नूनं मुक्तसंगानां तादृशानां द्विजर्षभ गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति २ महतां खलु विप्रर्षे उत्तमश्लोकपादयोः छायानिर्वृतचित्तानां न कुटुंबे स्पृहामतिः ३ संशयोऽयं महान् ब्रह्मन् दारागारसुतादिषु सक्तस्य यत्सिद्धिरभूत् कृष्णे च मतिरच्युता ४ श्रीशुक उवाच बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरंदरस आवेशितचेतसो भागवतपरमहंसदयितकथां किंचिदंतरायविहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति ५

प्रियव्रतस्य प्रथममात्मविद्यां ततो गृहाश्रमं ततः सर्वसंगत्यागेन मोक्षं च श्रुत्वा तत्र शङ्कितः पृच्छति प्रियव्रतो भागवतः आत्मारामः गृहे कथं रमते ... कर्मबंधः पराभवः ... भवति ... कारणं प्रश्न १ गृहे ... तत्राभि... तन्नूनं ... अभिनिवेशात् स्यात् ... भगवन्ताना ... भवति ... उत्तमश्लोकपादयोः छायायां ... चित्ते ... ३ ... संशयोऽयं महान् ... ४ ... अभिनिवेशादि ... भगवतः श्रीमच्चरणारविन्दमकरंदरस आवेशितचेतसो ... पदवीं ... शिव०

गुणविसर्गस्य गुणसृष्टेः परिबृंहणं सम्यङ्निरूपणं चिन्तया व्यवसितः सकलजगताम् अभिप्रायो येन सः। यद्वा तन्त्राचार्यैर्मते उक्ते स्वगुणा-
मभिप्रायोऽतिशीघ्रापतेन यत् अखिलैर्निगमैर्मूर्तिमद्भिर्वेदैर्निजगणैश्च मरीच्यादिभिः परिवृतः। सत्यलोकादवतीर्णः ७ स चन्द्रलाञ्छनं तत्र
उडुपतिश्चन्द्रस्तद्वत्प्रकाशमानो गन्धमादनस्य द्रोणीमवभासन्नुपसर्पं स इत्यन्वयः। अमरपरिवृढैर्देवेन्द्रादिभिः ८ हंसयानेनोपलक्षितेन एव पितर
मुपलभमानः सतपितापमिति लब्धपत्र पिता पुत्राभ्यामनुष्ठितपन्ताभ्यां सह नारदः कृताञ्जलिः सन् सहसैकान्त्याम्युपाकृतेन तस्य पापस्या
स्यानुष्ठाय प्रपन्नं तं तथा मन्दरद्रोण्यां नारदः उपदिशति मन्त्रश्लोकतेनेनमागतो मेति तानिष्यम् ९ हे भारत भगवानादिपुरुषो असला प्रपन्नत
मिति होवाचेत्यन्वयः।

अथ कदाचिद्भगवानादिदेवः एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसितसकलजगदभिप्राय आत्मयो
निरखिलनिगमनिजगणपरिवेष्टितः स्वभवनादवततार ७ स तत्र तत्र गगनतल उडुपतिरिव वि
मानावलिभिरनुपथममरपरिवृढैरभिपूज्यमानः पथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचार
णमुनिगणैरुपगीयमानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ८ तत्र ह वा एनं देवर्षिर्हंसयाने
न पितरं भगवन्तं हिरण्यगर्भमुपलभमानः सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपत
स्थे ९ भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणावतारसुजयः प्रियव्रतमा
दिपुरुषस्तं सदयहासावलोक इति होवाच १० श्रीभगवानुवाच निबोध तातेदमृतं ब्रवीमि मासूयि
तुं देवमर्हस्यप्रमेयम् वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ११

तेन नारदेनोपनीतमर्हणं यस्य सः सूक्तवाकेन यथोचितवाक्येन अतिशयेन उदितावर्णिता गुणगणाः अवताराः सुजयाः सर्वोत्कर्षाश्च यस्य
१० अयमुक्तिनिष्ठमद्वाक्यं प्रतिकूलं मत्वा मामप्यसूयां करिष्यतीति शङ्कमानो मामेवं वदामि किं तु मन्दृते न कुर्वीरेवं तत्तापयतीति वदन् प्रबोधति
निबोधेति हे तात मानं नेनो धेति निवभिः अनृतं च सत्यं च अप्रमेयं देवमसूयितुं दोषारोपेण द्रष्टुं नार्हसि तेन वततः तातः एषः त्वदु
न महर्षिः दिष्टमादिष्टमाज्ञां विवशा अस्वतन्त्राः सन्तो वहामः ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥

प्रियव्रतस्य गृहस्थस्यैवानन्तपदप्राप्तत्वे निःप्रसंगमाह यर्हीत्यादिना विस्तरशः प्रकृतिमनुजस्येसंतेन यर्हि वाव ह यदा ह वा वेति प्रसिद्ध्यादौ हरतिचलः
दिशामनुनाऽवनितलपरिपालनायोपामंत्रितोऽपि पुत्रो नैवाभ्यनंदत नैच्छत् अथ यत्तमेव भगवानादिदेवो ब्रह्मा स्वभवनादवततारेत्यन्व
यः उपामंत्रणे हेतुः आम्नाताः राज्ञां शास्त्रेणोक्ता ये प्रवराः श्रेष्ठा गुणगणास्तेषां गणस्यैकांतभाजनतया निपतनाश्रयत्वेन अनिच्छाया
यां हेतुः परमार्थसतत्वमात्मयाथात्म्यमवगतं येन सतथा अतः ब्रह्मसत्रेण आत्मध्यानेन कार्येण दीक्षिष्यमाणः नियमं गृह्णी

यर्हि वाव ह राजन्स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयांजसाऽवगतपरमा
र्थसतत्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकांतभाजन
तया स्वपित्रोपामंत्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेन समावेशितसकलका
रकक्रियाकलापो नैवाभ्यनंदद्यद्यपि तदप्रत्याम्नातव्यं तदधिकरण आत्मनोऽन्यस्मादस
तोऽपि पराभवमन्वीक्षमाणः ६

ख्यन् प्रागपि वासुदेव एव निरंतरसमाधियोगेनांचितैकाग्र्येण समावेशितः समर्पितः सकलकारकाणामिंद्रियाणां याः क्रियाः
तासां कलापो येन सः यद्यपि तत्पित्रोक्तं न प्रत्याख्येयं तथाऽपि तदधिकरणे तत्राधिकारे असतोऽपि मिथ्याभूतादपित
स्य प्रपंचादात्मनः पराभवमालोच्य पप्नाऽभ्यनंदत् ६॥ ॥ ॥ ॥ ॥ ॥

भा० पं०
३

नरुग्ध्वे वर्तमानस्य भोगान् भुंजानस्य कुतोऽपि भ्रानाभावो मोहो वा अतस्तत्त्यागेन वनवास एव युक्तस्तत्राह मयं संसारस्यादेव श्रमतस्य अजितेंद्रियस्य वनेष्वपि संगभिया वनाद्वनांतरं गच्छतोऽपि स्यादित्यर्थः स्वदेहवद्वट्सपत्नाः शब्दादयो मनोबुद्धींद्रियाणि च वशस्य तथाप्यतएव वनेष्वपि यत आत्मबुद्धत्वेन जितेंद्रियत्वात् तस्य रतेः आत्मारामस्य अवघोरागादिदोषः किं करोति न करोत्येव १७ न गृहे वसतः पुरुषस्य राजादयः संभवंति न तु वनस्थस्य तत्राह यः षट् वैरिणः षडिंद्रियाणि विजिगीषमाणः स एव गृहे गृहेषु स्थित्वा नेवानमत्यंतं निरोधमकुर्वन् जेतुं यतेत हीला ख्वरिष्टकामं गृहेऽस्य तत्र वा विचरेत् यतो लोके ऊर्जितादीनां दुर्गाश्रितेन एवास्येति जयति पश्यद्दुर्गंवासस्य तत्र वो वर्तते युक्त्यनेपाद्वेषु प्रहरेदित्यर्थः १८ इदं च गृहदुर्गाश्रयणं जोकृतानां [illegible] त्वं तु अब्जनाभस्याङ्घ्रिसरोजकोश एव दुर्गं तदाश्रितः अतएव निर्जितषट्सपत्नस्य तथापि पुरुषेणेश्वरेणातिदिष्टान् दत्तान् भोगान् स्त्रावतमेद्व

मयं श्रमतस्य वनेष्वपि स्याद्यतः स आस्ते सहषट्सपत्नः जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् १७ यः षट्सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् १८ त्वं त्वब्जनाभांघ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः भुंक्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसंगः प्रकृतिं भजस्व १९ श्रीशुक उवाच इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोरनुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह २० भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् २१

३

पुरुषातिदिष्टान् विमुक्तसंगः सन् प्रकृतिं स्वरूपं भजस्व आत्मनिष्ठो भवेत्यर्थः १९ आत्मनो लघुतया अल्पतया नम्रया सन् मंगीचकार यतः आत्मनोपदेशः प्रवर्तनं तत् अलघुतया ओरवेलवाढं तथा करिष्यामीति अवनतकंधरः सन् जगाम २० मनुना संपूज्य उपकल्पिता सज्जा पूजा यस्य प्रियव्रतस्य योगमनुशासनं नारदस्य चरितभ्यं [illegible] विषमं पात्रातयोरभिसमीक्षमाणयोः सतोः आत्मनः सम्यगवस्थानं अवाङ्मनसं वाङ्मनसयोरविषयं [illegible] अवाक्वाचामगोचरं कथं चिन्मनसः क्षयं विषमतः अव्यवहृतं व्यवहारशून्यं [illegible]

विवक्षया त्वमेवाहं च तुभिः नेति तस्य कृतं तेन निर्मितं तत्र भक्त्या वः तपआदिभिः विहितं भन्यथा कर्तुं न विभ्रम्यात प्रश्नं न भवेत् मनीषया सामा
दिबुद्धिबलेन परतः बलवत्त्वात् १२ तत्र देहयोगे तावत्पारतंत्र्यं प्रसिद्धमित्याह भवायेति भवो जन्म भवो घर्थं भव्यक्तेने [illegible] दिष्टं
दत्तं देहयोगं जनताऽजीवसमूहः सदाधत्ते न त्वन्यथा कर्तुं शक्नोति स्वं गृहे प्रियपन्नते १३ कर्मकारणोऽपि पारतंत्र्यमाह यद्वाचीति यस्य वादि
वेदलक्षणयां तंत्यां दामन्याम् गुणाः सत्वादयः तत्र स्वकर्माणि च यानि कर्माणि तन्निबंधनेदामभिर्नीह्त्वाणि शब्दैः सुदुस्तरैः सुदृढैः
हि वत्स वयं सर्वे सुयोजिताः नियताः सन्तस्तस्मै ईश्वराय बलिं वहामः तदिच्छया कर्म कुर्मः नसि नासिकायां प्रोता वृषाः संततस्य
नुब्धे दीवलीवर्दाय पथ्या द्विपदे च पूरुषाय १४ भोगेच्छ पारतंत्र्यमाह ईशा ईश्वरेण अभिसृष्टं दत्तमेव स्वं गृहे प्रियपन्नत स्वर्वरूह्येत्स्वा

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा नैवार्थधर्मैः परतः स्वतो वा कृतं विहंतुं तनुभृद्विभूयात् १२ भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताऽङ्गधत्ते १३ यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः १४ ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसंगात् आस्थाय तत्तद्यदयुंक्त नाथश्चक्षुष्मतान्धा इव नीयमानाः १५ मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः यथाऽनुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते ॥१६॥

कुर्मः यथा स्वानि नादत्त एव कर्णिशादि बलीवर्दो भक्तपं विनत्वे अश्रुपातहेतु न चैवं वैषम्यमीश्वरस्य यतो गुणकर्मसंगात्स्वायो
यद्देवतिर्यगादिलक्षणं देहमयुंक्त योजितवान् तत्तदास्थाय प्रविश्य यथा चक्षुष्मता सुखाय नीयमाना अंधा नीयमानाः
संतः १५ नन्वेतत्सर्वं भवादृशस्य वंचनत्वाल्लत्वं विरक्त्यास्थाय कथमाह मुक्तोऽपीति यावदारब्धं कर्म तावत् यथा स्वप्ने अनुभूतं प्रति
यातनिद्रः जातनिद्रः अभिमानशून्यत्वात्स्मरति न किमोजमायसनयापुनर्जन्म भवेत्तत्राह किं त्वन्येति तारंभकान्गुणान्
न वृणोति कामनाभिर्न बंधते न संभजते ॥१६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तस्मिन्नारमणस्याश्रमे श्रीमच्चरणारविंदयोरविरतस्मरणेनाविगलितः अखंडितो यः परमो भक्तियोगस्तस्यानुभावेन विशोधितांतःकरणे प्रतीतो यो भगवान् तस्मिन्नात्मनः त्वंपदार्थस्य तादात्म्यम् अविशेषेण विशेषादर्शनाद्युपाधिः तद्योगेन प्रापुः २७ ॥ २८ उपशमाश्रयेषु सत्सु दशकोटिभिरेकमर्बुदं गणनादशानि अर्बुदानि एकादशार्बुदानि जगतीं भुंजन् रक्षन्नपि तत्रो धर्मपालनं विघ्नयभोगप्रभावे भौमेष्वेत त्रांशमप्यसौ नैव धर्मपालनमाह अव्याहता अखिलाः पुरुषकाराः पौरुषाणि यस्मात्तेन सारेण बलेन संभृतो दत्तौ दोर्दंडौ तेन यो युगले तेनापीडितः अतः केऽयोग्योगणास्तस्य तत्तनितं कारः तैनैवपु

तस्मिन्नुरुवा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविंदाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितांतर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः २७ अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्तमस्तामसो रैवत इति मन्वंतराधिपतयः २८ एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंडयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे २९

ऽपि विनाविरमितानि रस्ता धर्मप्रतिपक्षा येन भौमातिशयमाह बर्हिष्मत्याः स्वभार्यायाः अनुदिनमेधमानैः प्रमोदप्रसृतिभिः पराभूयमानविवेक इव अतविषयासक्तोऽत्मानमनवबुध्यमान इव बुभुजे तत्र प्रमोदः पतिदर्शनाद्धर्षः ततः प्रसरणमभ्युत्थानादिलीला ततो यौषिण्यं योषित्स्वभावकृतं शृंगाराद्यनुभावप्रकाशनम् ततो व्रीडया प्रमुषिताः संकोचिता हासावलोकाः ततो रुचिरक्ष्वेल्यादयः परीहासवाक्यादिभिस्तैः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ शिव०

प्रत्र तन्त्रेऽभिभिन्नच्यवनं प्राप्स्यामीत्येवं यो मनोरथः सः परोक्षेऽर्हल्लोकप्रतिसंचितः संपादितो यस्य सः नारदस्यानुमतेन तत्रैव स्थापयित्वा श्री
नीविषमोद्गतरोयोविषयविषजलाशयोऽरूपस्य आशादिकेवक्तिवासनाभोगिध्वानस्याः उपरतोऽभवत् २२ पतत्ख्यः ... रम
रमत तत्रोक्तमुत्तरमुपसंहरति रतिकृवावरस्यमेवदि अधिनिवेशितः प्रापितः कर्मो विकारो यस्य अखिलस्य जगतो बंधध्वंसनः परो
ऽनुभावो यस्य तस्य पदंघ्रियुगलं तस्यानवरतं ध्यानं तदनुभावेन परिरंभितकषायापायो दग्धरागादिमलः आपापो यस्य अतः श्रीव
दातः एतोऽपि मत्कृतानिर्गतास्त्राकीनामाशापालनेन मानवर्जनः २३

मतरपि परोक्षे वंप्रतिसंचितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामंडलाधिपतिं निधाय आस्था
व्यस्य समति विषमविषयविषजलाशयादुपरराम २२ रतिकृदावलजगतीपतिरीश्वरेच्छया
ऽधिनिवेशितकर्माधिकारोऽखिलजगबंधध्वंसनपरानुभावस्य भगवत आदिपुरुषस्यांघ्रियुगला
नवरतध्यानानुभावेन परिरंभितकषायापायोऽवदातोऽपि मानवर्जनो महतां महीतलमनुश
शास २३ अथ च दुरितं प्रज्ञापतेर्बिंबकर्मणः उपचये वाक्षितीं नामतस्यामुत्कृवावमात्मजानां
त्मसमानशीलगुणकर्महपवीवोदारानदशभावपांचभरवक... चप्रवीपसौम्नं स्वतीना
म २४ श्रीनाभेर्धर्मजिकुपद्मनाकुमतोवीरकिरणपरेनोध्यनपदसुवनमेधातिथिवीतिहोत्र
कवपदृतिसर्वेरवाग्निनामानः २५ एते बालकविमहावीरः सवनरतिश्रपमाननुजध्वरेतमत्त
आत्मविद्यापामर्भभावादारभ्यकृतपरिव्रज्याः पारमहंस्यमेव आश्रममभजन् २६

उक्तिविलसयेकृतिषु सिंहोवावेतिनिश्चये आमनः समानैः शीलादिभिः दारान्मकृतोद्दशपुत्रान् जनयामास २४ नानाद्
आग्नीध्रः इध्मजिह्वः यज्ञबाहुः महावीरः हिरण्यरेताः घृतपृष्ठः सवनः मेधातिथिः वीतिहोत्रः कविः इत्येते अग्नी
नोनामानि येषां ते २५ गर्भभावान्बाल्यादारभ्य ॥ २६ ॥
" " " " " "

अतो आश्चर्यतज्ञः सामर्थ्यमिति परिहृदभिप्रायज्ञो भगवान्बादरायणिराह नैवमिति जिताः षड्गुणाः इंद्रियाणि षडूर्मयो वा
यैस्तेषां एवंविधः पुरुषकारः इति न चित्रं नासंभावितं यतो विदूरविगतः अंत्यजोऽपि यस्योरुक्रमस्य नाम सकृदुच्चारयेत् स अ-
धुना तत्क्षणमेव बंधं संसारम् तत्याजेति पाठे अध्यपमेवार्थः पाठांतरे तत्संचोऽजलत्वं जहाति शुद्धो भवतीत्यर्थः ३५
तस्य पराक्रममुपसंहरन्निवृत्तिक्रममाह स एवमिति देवर्षिचरणयोरनुशयनमुपसत्तिः तदनुपतितो यो गुणविस-
र्गो राज्यादिप्रपंचः तेन संसर्गेण आत्मनि मनसि निर्वेदोपस्य ३६ तमाह अहो असाध्वनुष्ठितं यद्यतो ।भिनिवेशितः

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदंघ्रिरजसा जितषड्गुणानाम् चित्रं विदूरविगतः सकृदाद-
दीत यन्नामधेयमधुना स जहाति बंधं ३५ स एवमपरिमितबलपराक्रम एकदा तु देवर्षिच-
रणानुशयनानुपतितगुणविसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमा-
ह ३६ अहो असाध्वनुष्ठितं यदभिनिवेशितो हमिंद्रियैरविद्यारचितविषमविषयांधकूपे
तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयांचकार ३७ परदेवताप्र-
सादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं
मृतकमिव सह महाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो
भगवतो नारदस्य पदवीं पुनरेवानुससार ३८ तस्य ह वा एते श्लोकाः प्रियव्रतकृतं कर्म को
नु कुर्याद्विनेश्वरम् यो नेमिनिम्नै~~[illegible]~~रकरोच्छायां घ्नन् सप्त वारिधीन् ३९

ततत्त्वलमलं विषयैः विनोदमृगं मर्कटम् ३७ परदेवतायाः हरेः प्रसादेनाधिगतः प्राप्तो य आत्मप्रत्यवमर्शो विवेक-
स्तेन नारदस्य पदवीं तदुपादिष्टमार्गमेव पुनरनुससारेत्यन्वयः किं कृत्वा अनुगतेभ्यः पुत्रेभ्य इमां पृथ्वीं विभज्य भु-
क्तो भोगो यस्याः तां भार्यां महाविभूतिः साम्राज्यसंपत्तस्सहितां महिषीं मृतशरीरमिव परित्यज्य तत्र हेतुः हृदि निहितो नि-
र्वेदो येन हृदीत्यस्योत्तरत्राप्यन्वयः हृदि गृहीतो निश्चितो हरेर्विहारलीलानुभावः सागमहात्म्यं येन ३८ तस्य महिमोपनिवं-

प्रभावातिशयमाह यावदिति वसुधातलं लोकालोकपर्यंतमवभासयति मेरुं प्रदक्षिणीकुर्वन्नादित्यः तस्मिन्नर्धेनैवोपलक्षितं प्रतपति
प्रकाशयति अर्धेन चावच्छादयति तमसाच्छादयतीति तदा द्वितीयः पतंगः सूर्य इव पर्यक्रामत् न चेदमसंभावितमित्याह भगव
दुपासनेनोपचितः अतिपुरुषः पुरुषानतिक्रांतः प्रभावो यस्य ३० ये वै उ हेति प्रसिद्धाः तस्य रथचरणयोः कृताः परिखाः
नेमिभिः कृताः ते सप्त सिंधव आसन् ३१ जानाहि तेषां परिमाणं पूर्वस्मिन्निति द्विगुणं पूर्वद्वीपविस्तारमानं उत्तरस्तनो द्विगुणेन विस्तारमानेन तेभ्यो
सिंधुभ्यो बहिः समंततः उपक्लृप्ताः रचिताः पश्चात् सिंधुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपानामपि बहिः सिंधव इत्याह क्षारोदेति
दधिमंडमपि तं दधि एते सप्त जलधयः ~~सप्तद्वीपानां परिखा इवाभ्यंतरे तैः संवेष्टिता ये द्वीपास्तैः समाना विस्तारेण बहि~~
~~र्नीताः पृथक् पृथक् सर्वतः कीर्तिताः ३२~~ ॥ ३४

यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छा
दयति तदा हि भगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन् समजवेन रथेन ज्योतिर्म
येन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुक्रामन् द्वितीय इव पतंगः ३० ये वा उ हत
द्रथचरणनेमिकृतपरिखातास्ते सप्त सिंधव आसन् यत एव कृताः सप्त भुवो द्वीपाः ३१ जंबूप्लक्षशाल्म
लिकुशक्रौंचशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासंख्यं द्विगुण
मानेन बहिः समंतत उपक्लृप्ताः ३२ क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमंडोदशुद्धोदाः स
प्त जलधयः सप्त द्वीपपरिखा इवाभ्यंतरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु
पृथक्परित उपकल्पितास्तेषु जंब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहु
हिरण्यरेतो घृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विद
धे ३३ दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद्देवयानी नाम काव्यसुता ॥ ३४ ॥

सप्तद्वीपानां परिखा इवाभ्यंतरे तैः संवेष्टिता ये द्वीपास्तैः समाना विस्तारेण बहिर्नीताः पृथक् पृथक् सर्वतः कीर्तिता ॥ ३३ ॥ ३४ ॥

भा० पं० सललिते गमने पदविन्यासे गतौ विलासो यस्याः चकारस्तस्याश्चैतैकवा[illegible]चापरणेरणत्वेनेतिध्वनिं कुर्वतो रवि
६ स्यचरणाभरणाभरणस्य स्वनेन म श्रामिलितेनयनेरावननलिन[illegible]मुकुलेन योग्यगलमीषद्विकचय्य किंचिदुन्मी
ल्य अन्वचष्ट ददर्श एतामेव देवीं मकरध्वजस्य वशमुपनीतः सन् जडवदितिष्ठद्वयस्मात्, न दशश्लोकान्वाचेत्या
श्यानुकरोच्चवैदग्ध्यनेन पशीकारान्धेदि विज्ञानां देवानां मनुजानां च यानि मनांसि तेन यतानिचानेष्यामाल्हाद
दुर्धं गत्यादिभिः स्तनं मनसि कामस्य प्रति वरं प्रवेश द्वारं विदधतीं गतिश्च विहारश्च कौतावितपयः वलोकश्च

तस्याः सुललितगमनपदविन्यासगतिविलासापास्त्यानुपदं रणरणायमानहंसिचरणा-
भरणस्वनमपाकर्णेन रदेवकुमारः समाधियोगेनाभिलषितनयननलिनमुकुलयुगलमी-
षद्विकचय्यन्नचष्ट तामेवाविदूरे मधुकरमिव सुमनसउपजिघ्रन्तीं द्विजमनुज-
मनोनयनाह्लाददायिचेष्टितविहारविनयावलोकस्तत्र तदैव प्रवेशमनसिजरणकुसुमा-
युधस्य विधतीं विवरम् ६ निजमुखविगलितामृतनासवसन्तहासमाधुरीमोदमदान्धी-
भूतमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्लोकस्यन्दनस्तनकलशकुचभारसनादे-
वीं तदवलोकनेन विकृतो वसरस्वभगवतो मकरध्वजस्य वशमुपनीतो जडवदिति
होवाच ॥७॥

सुस्वरायन्त्यामी च श्रवणपवाच्यनेत्रादयस्ते ६ निजमुखविगलितममृतमिव स्वादुश्वासपवमिव मादकं च
यत्सुहासं भाषणं तस्मिन् आमोदोनि द्रूवा सुजंधः तेन मदं धायेम धुकरनिकरास्तैरुपरोधः आवरणं तेन
मर्यादितः शीघ्रोधः पदविन्यासः तेन वल्लोस्पंदनं किंचिच्चलनं स्तनकलशयोः कवरभारे रसनादेश्च यस्या

६
शिव०

भरतस्यापि द्वीपे कृतं सरिद्गिरिवनादिभिः सीमा च येन कृता भरतानां निर्दिष्टा द्वे द्वे सप्त विभागशः ४० भौमं पातालजं दिव्यं स्वर्गजं मानुषं मर्त्यलोकजं महित्वं महिलं वैभवं योगिरूपं तत्स्यमेवे भुक्त्वा तु जनाविरमत् कालरात्रि [illegible] ॥ ४१ ॥ इति पंचमे टीकायां प्रथमोऽध्यायः १ पितरि संप्रवृत्ते आग्नीध्रचरित्रं द्वितीयेन उच्यते पर्यगोपायदित्यादि ... पुत्रवत् पालयामास धर्मावेक्षमाणः धर्ममवेक्षमाण इत्यर्थः १ पितृलोककामः पुत्रकामः सुरवराणां वनिताः क्रीडा

भरतस्यापि कृतं येन सरिद्गिरिवनादिभिः सीमा च भरतनिर्दिष्टा द्वीपे द्वीपे विभागशः ४० भौमं दिव्यं मानुषं च महित्वं महिलं कर्मयोगजम् यश्चक्रे निर्भयोपायं पुरुषानुजग्रिषुः ४१ इति श्रीभागवते महापुराणे पंचमस्कन्धे भुवनकोशे प्रियव्रतविजये प्रथमोऽध्यायः १ श्रीशुक उवाच एवं पितरि संप्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बूद्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् १ स च कदाचित् पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव २ तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ३ सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहंगममिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिल कु[illegible]कलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुपबभ्राम ४

... तस्य क्रीडाचलस्य द्रोण्यां ... २ तदुपलभ्य ... ३ आश्रमोपवनमुपबभ्राम ... विविधानां निबिडानां विटपिनां ... पुरटलताः स्वर्णलताः ... स्थलविहंगमाः ...

भा० पं०
७

नूपुरस्वनमाकर्ण्याह वाचमिति नम्यंनवचें गत पंजरयो: नूपुरकोलिनिरीणामंतर्गत शब्ददोकेवलं वाचं शरणमि:क
यं भृतामग्रहपाग्रदक्ष वक्रकामुद्वेरा अतिप्रकटाच नाच लोच दीनं परिध्यानं नलं नितं वकांति त्वेन प्रकल्प्याह कंदंव
कुसुमस्य स्वचिपि: अंक विटंक विवे च मितं वस्य लघरं मं हले कुलब्ध्वा पाठांतो अंगे नि सं वोधनम् मखेला मालं त्वाह
यत्याम लान परी धीव तंते वक्षं नितं वकांति त्वेन प्रकल्प्य वक्षमध्ये वप चपनि केचनेव ल्वकं लमिति ११ लता वालं त्वाह
रलयो: स्तनयो: किं संभृतं किं दूरं मस्ति मनोहरं किंचिद स्तीत्येताव नजानामि यतो मध्ये कृशो ऽपि त्वं कुचद्वेलां वहसि धार

वाचं पञ्चशरस्य पञ्जररनिर्जितीणांवल्लन्मुद्रूपमुद्वेतां कलावामनुभ्यम् लब्ध्वाकदंवत्न चिरं क
विटंकविंवे पस्यामलान परिधि: क्व च वल्वलं ने ११ किं संभृतं तत्न चिरयो द्विजशृंग
कोलेमध्ये कृशो वहसि पञ्चदशि: श्रितामे पंकोरुहण: स्मरभिरामविशालां ईदकृ येना
ऽमं मंस्तुभगमे स्मरभीकरोषि १२ लोकं प्रदर्शय सुहृत्तमम तावकं मे यत्रस्य रस्य मरा
साऽवपवावत्सवौ भस्मविधिध्वमन उन्नयनो विभर्ति वकुंभ्रुतं सरसरास
सुधादिवक्त्रे ॥ १३ ॥

पक्षि पत्र च मे दर्शिदं ष्टि: श्रितासं लग्नाऽस्ति अन्यपेदं वपं न घते इति भाव: स्तनगतं कुंकुममालं त्वाह पंकोरुह
लाञ्छनमनल वविशालो ईदक स्वत्पदर्वे: कुत स्त्यत आह येन पंकेन आमा मं स्तुरभी करोषि स्मंघिपकं करोषी
ति १२ लोकंस्यानं पत्रस्योजन: उरसा इत्यमत्त वो वपवो विभर्ति मनसउन्नयनो तो मको पाठांतरे इत्थं भृतं लं दृष्टो
त्कंतोपावक्त्रे च वकुंभ्रुतं विभर्ति किं तदाह स्तोम धुरालाप: रासो विलास स्तास्यां सहिता सुधा अधरामृतं मा दिश

७

कात्वं शैले गिरावस्मिन् किं चिकीर्षसि मुनिवर्येत्यादि पुंस्त्वेन संबोधनादिना प्रातः कारणार्थमस्य हनिनर्थंन नं भग
वतः परदेवतायाः तस्यमायास्मि नामालक्ष्याकुहेलहन्सविविन्ध्यनिर्जले धनुर्विभर्षि किं नाम नो ऽर्थं न वेवतां भग
किं कार्यं मस्ति किं वा प्रमत्तानंतिने द्विपान् भगनत्यानस्म दादीन् भगपलेनानवशीकर्तुं धनुर्बिभर्षि यत्पतीस
यःच कपदा बालं द्याकुवालाविमोशन पत्रेने त्रकमले एव पत्राणि पि-त्वरानि पयोः णानो विभ्रमेणमं पदो पुंस्त्वा

कात्वं विकीर्षसि च किं मुनिवर्य शैले मायापि नास्मि कापि भगवत्परदेवतायाः विन्ध्ये विभर्षि
धनुर्विहृत्स्व दात्मनो ऽर्थं किं वा मजा भग पले विपने प्रमदानां बालं विमोभगवतः
शालेप त्रपत्रो णांनाव पुंस्त्वह चिरानति लिग्मदंनो कस्मेप पुदसि बनेविचरन्तो विप्रा: देमा
पनोन डुध्रिपांन वविक्रमो ऽस्तु [illegible] मे भगवतः पति: पठंति गायंति साम सहर
हस्य मज्ज स्वमीशम् पुष्पाञ्चिरनानि कुलितः सुमनोभिरवष्टि: सर्वे मनस्य बिजल
जवनेशात्वा: ॥१०॥

ध्यां विनाऽपि किंचिदेव पत्रमयाकाल्पिनने आभ्यां परभाग स्वपुंस्त्व स्यानी प स्या भावान् अतिति जैनीति ग्रौ दंतो भ्र
गभागो पयो लोक कलैप्रयो कुशि च्छ्वलि निनविप्रा: अतो भयादेतावन्तार्थं भासुरेननाऽपं विक्रमो ऽस्माकं देमा
पाहुट तदंगपरिमललोभेन्तानुज [illegible] नो भ्रमरा नालं द्यातशिष्टा सनि भजन्त ते नन्दु [illegible] शिवोनो विल्ललि
ताविजलिनाः सुमन सामधिनो वष्टिः जलिनानिकु सुमानि भजन्तो रुपर्दः पृष्टा तेनो पमावे दशात्वा इवेति" १०

मुख्यादीनां दृढं बंधम् १८ सूत्वा प्रसूय उपतस्थे अभजत् २० औत्पत्तिकेनैव स्वभावेन संहननं दृढांग त्वम् २१ कामानां भो
ग्यैः अधि अधिकं मन्यमानः श्रुतिभिः वेदोक्तैः कर्मभिः अवारुंध प्राप्य मादयंते मोदंते ॥ २२ ॥ इति एवं संज्ञाः ... २३

सा च तत्र तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्स
रोपलक्षणं कालं जंबूद्वीपपतिना भौमस्वर्गभोगान्बुभुजे १८ तस्यामु ह वा आत्मजान्स राजवर आ
ग्नीध्रो नाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानज
नयत् सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे २०
आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यना
मानि यथाभागं जंबूद्वीपवर्षाणि बुभुजुः २१ आग्नीध्रो राजातृप्तः कामानामप्सरसमेवा
नुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुंध यत्र पितरो मादयंते २२ संपरेते पि
तरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीति
मिति संज्ञा नवोदवहन् २३ इति श्रीभागवते महापुराणे पंचमस्कंधे आग्नीध्रवंशानुच
रिते द्वितीयोऽध्यायः २ श्रीशुक उवाच नाभिरपत्यकामोऽप्रजया मेरुदेव्या भगवंतं यज्ञपुरुषमवहिता
त्माऽयजत १ तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमं
त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान्भागवतवात्सल्यतया सुप्रतीक
आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयंगमं मनोनयनानंदनावय

इति पंचमे टीकायां द्वितीयोऽध्यायः २ ततो वै चरितं नाभेः परं मंगलमीर्यते यस्य यज्ञे प्रतीतः सन्पुत्रोऽभूदृषभो हरिः
नाभिरिति अप्रजया अपुत्रया मेरुदेव्या भार्यया सह १ प्रवर्ग्यसंज्ञकेषु कर्मसु क्रियमाणेषु द्रव्यादयः सप्त ये योगाः उपाया

यु॰ कावा तव लोके आत्मनो देहस्य ध्वनितस हारः अंगदेस लेच अदनाद्धवैराग्यात् रुविरितित त्वं वधीगं धोवानि आग धनि पतिनां तुलाभि
प्रापम अदनां घाहिरंगभानी निपाठ मप्रतावप्दोजनात वहिश्नैनेव ध्वनिर्मांतीत्यर्थः पतेत्तु विहंगाः कलाः सिवि लुभ्य नाश्रा
ति अनभ्न नन्यो आभिचाकशीतीतिश्रुतेः विहंगाः कलाः सोस्य त्रकृतुः नवचकोर्ती विस्मारिवनि मिद्योन्मकरो आनिमि ओरत्न
नेत्र त्वं ननिमिषिप्युन्यो उल्लसंतो मकरोन पाकेरांकुडले यो स्तो किंच नवमुरवेला । तिसरश्च न तदेवाह उद्विग्नं च चलं मीनतु
गलमिव नेत्र ह्यपस्मिन् दिजाः दंताः तेषांपंक्त्या शोचिः शोभा यस्मिन् सारसित्र द्विजाः राजहंसाः आसन्नो भंग निकरा
रकेशास्तोमः परिमलल्लब्धमंगस्तोमो यापस्मिन् १४॥

कावा त्वद्ध्वनिरदनाद्भविरंगनालि विहंगाः कलास्यनिमिषोन्मकरोचकलौ उद्विग्नमीन पुगलं द्वि
जपंक्तिशोचित्तासन्नभंगनिकरं सरस्तु वेने १४ वोसोल वा कुर बरोज हंतः पतेगोदित्नुत्र मनम
मनः राजपतेऽद्विलोभे मुलं न तेस्मारसिव कुजटावदुष्यं कबोनि लोहरतिलंपटहाबनीवाम १९ हृद
नपोधन न तपश्चरतीं न पो धूल्यात तु मनतप ला भवतो पतलब्धम् चतुं तपोहं सिमयास रूमित्र
मह्यं किं वा प्रसीदति सर्वे भवभावने मे १६ न त्वां पमानिद पितं द्विजदेवदत्तं यस्मिन्नतोहग
पिनोन विपातिलग्नम् मांचान्हरुंज्यहिं सिनेतु मनुमंतेन चिनपतः प्रतिसरं तु शिवाः सचित्र्यः
१७ श्रीशुक उवाच रतिललना इत्यपानिविशारदो गाम्यवेदध्यया परिभावयानां वि बु
ध्ववध्वं विबुधमनिरचिसभाऽञ्जपामास १८॥

पतंगः कंडुकः मनमनः मुमकि तस्य मे आलिंगि राजपते वेऽत्य ललनां नपति व कोके रासन्न तं मुक्वं घनं नस्मरति नसंभालप
सिकिं नाई धूर्तो नाविकित हरति एतन्नेस्मासि किम १९ उपलब्धं ज्ञानम् महंगम तेमित्र मया सतु तप श्चरतेन महंसि किंच सर्वे
भवभावनः सद्दष्टि विस्तारको नेत्र मे प्रसीदति त्वां भाव्यं केन्य यतो सर्वः १६ द्विज देवेन मे लग्नादत्ते दकुमनम
लग्नं सतं नाप पातिकि चाहं रहं गिपतः सा चिन्नं तत्र मां बल दयोनं नेनं तुमहं सिसचिवात्सव सख्योऽपि शिवा त्वत्रं

वाङ्मनसागोचरोऽपि भक्तानां सुखसाध्य एवेत्याहुः। हेदेव मपरिजनेत्यनुरागेण विरचिता याः शबलसंशब्दाः गद्गदा गिरः सलिलं च सिताः किसलयाश्च शुद्धपल्लवाः। शिलीति पाठे शिलं कुशादि मञ्जरी एवमादिभिः संभृतया संपादितया पूजया परितुष्यसि ७ अत एवेति प्रकारान्तरे अन्यथानु अनया इज्यया यागेनापि उरुभारभरया अनेकाङ्गसमृद्धयापि भवतः समुपचितमपेक्षितं प्रयोजनं नैव पश्यामः ८ अत्र हेतुः आत्मनः स्वत एव अनुसवनं सर्वदा अञ्जसा साक्षात् बोभूयमाना अतिशयेन भवन्तो ये पुरुषार्थास्तत्स्वरूपस्य न चैवं सत्यपि दानानर्थक्यमित्याहुः किंत्विति सकामानामस्माकमेवैतदुपपद्यते न तवेत्यर्थः ८॥ ॥

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि संभृतया सपर्यया किल परम परितुष्यसि ७ अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ८ आत्मन एवानुसवनमञ्जसाव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ९ तद्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परम परमपुरुषप्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः १० अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भगवान्निजपुरुषेक्षणविषय आसीत् ११ असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगणपरममङ्गलायनगुणगणकथनोऽसि ॥१२॥ ॥ ॥ ॥

स्वापयोगमेव प्रदर्शयन्तीति तद्यथेति परमेष्ठ्योऽपि परमपुरुषप्रकर्षपुरुषाकरुणया उपकल्पयिष्यन् संपादयिष्यन् च कामान् कामितं च नापचितः अनपचितः अपूजितः शबपूज्यः स्वयमेवोपलक्षितः दृष्टोऽसि इतरवत् साधुवत् १० यद्यपि त्वदर्शनं न मोक्षं भ्रान्तोऽसि तथापि हे अर्हत्तम राजर्षेर्बर्हिषि यज्ञे निजपुरुषाणां त्वदेकान्तानां मत्स्वाकमीक्षणविषयो भवान् यर्हि यदा आसीत् तदा स एव मे वरः संजातः ११ दर्शनस्य दुर्लभतामाहुः असङ्गेनाभ्यासेन निशितं यज्ज्ञानं तदेवानलस्तेन विधूता अशेषा मलाः येषां भवत्स्वभावानामिव भवत्स्वभावो येषाम् तान् आत्मारामाणामेवंभूतानां मुनीनामपि परममङ्गलायनं गुणगणकथनमेव न तु दर्शनं यस्य सः

अथ पतत्यादिनिपातनवाक्कुलत्वं वा वेणालंबनातथ आधिकृतमज्जनांघ्रियुगलद्वयं चनुष्टयंचेन किरणपंचेनेनोमयं पुरुषविशिष्ट
अथ पतित्यादिनिपातनवाक्कुलत्वं वा वेणालंबनातथ आधिकृतमज्जनांप्रियुगलद्वयं चरणद्वयं चेन किरलपंचेने नोभयं पुरुषविशिष्ट
नरमिनयापुरुषोनमतिसंचः अरुणेना प्रेणेलसन्नोपतस्थुः अभन्तिसन्नचयः विलसत् श्रीवत्सएवल्ललामं चिङ्गं यस्य दरवर
पानेः वनरुहं पद्मम् अप्रचूरीवर्तते अमन्तमणिः कौस्तुभः एवमादिभिरुपलक्षितम् २ स्फुरत्किरणपिप्रवरामणयः तेऽमपानियानि
दुकुटादीन्यंगानांमृताभरणानितेर्विभूषितम् वहुमानोद्दतेः अध्वना स्वीनमध्यनिनिविषम् ४ अहंसि त्वादिना निगदेन स्तुवंति
हे अहंत्तमपरिहसोऽपि त्वमनुपथानांनोऽस्माकमहंसामुकुः स्वयमेवलोकनुमहंसि ननु चयं ल्लोन गतान् त्याकुम

अथ हृत्कमलविष्कृतमज्जनपुगलद्वयं किरणपंचपुरुषविशेषं कपिशकौशेयांबरधरमुरसि विलस
त् श्रीवत्सलल्लामं दरवरवनरुहवनमालाऽऽकूर्मेखलमणिगदादिभिरुपलालितम् २ स्फुरद्दि
रण्मयमकुटकुंडलकटककटिसूत्रहारकेयूरनूपुरांगुलीयकाभरणविभूषितं निर्मलकौस्तुभ
मरूपनयोऽध्वनाऽव्योनमध्यमनुपलभ्यमबकुमानमहंसोनानंनेतश्चोबालाउपतस्थुः ४
ऋषय ऊचुः अहंसि मुहुरर्हन्नमाहूतमस्माकमनुपथानांनमोनमस्त्वेनावत्सदुपशिक्षितं
कोऽहमितिप्रमान प्रकृतिगुणव्यतिकरविनिर्मितोऽशेषेश्वरस्य प्रकृतिपुरुषयोरवौक्तनाभिनोऽमस्वरूप
कृतिभीरुपनिरूपणाम् ५ सकलजननिकायवृजिननिरशनशिवतमप्रवरगुणगणैकदेशक
थनाद्दते॥६॥

मोनमरस्येतदेवास्माकंसम्दिरुपशिक्षितम् त्वद्रूपस्य दुर्ज्ञेयत्वात् नदेवाहुः कोऽहमितिप्रकृतिगुणानां व्यतिकरः प्रपंचस्तस्मि
न्नेवमतिर्यस्य अतएवानीशः प्रकृतिपुरुषयोः परस्य अनतएवईश्वरस्य अर्वाक्तनामितत्वामस्यप्रतीतिभिः प्रपंचोतर्जनाभिः नो
मच्चरूपं श्रीकृष्ण आकारस्तामिरत्वद्वहरूपनिरूपणं कर्तुं कोनाम पुमानर्हति ५ सकलजनानां त्रमेवादतिनाधिक्येनत्याकुं वकल
जननिकायस्य वृजिनंनिरस्यंतीतितथा शिवतमाः प्रवरा श्रवये गुणगणास्तेषामेकदेशस्य कथनादिना अन्ध
कनार्हति॥६॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा० पं०
१०

आग्नीध्रो येनाभी १८ पतिं नाभिम् ॥ हे विष्णुदत्त तस्याः अवरोधायने अन्तःपुरे मेरुदेव्याः शुक्लया शुद्धसत्त्वमय्या तत्र नाभौ धर्मान्
वातरशनानां दिगम्बराणां श्रमणानां तपस्विनाम् ऊर्ध्वमन्थिनां नैष्ठिकब्रह्मचारिणाम् २१ इति पंच
मटीकायां तृतीयोऽध्यायः ३ चतुर्थो द्वितिभिः श्लोकैः ऋषभस्याभिहितं महत्त्व लोकाचारे येन स लोके मैत्र्या च निदर्शितम् १ चतु
र्थे तत्पुत्रस्य राज्यं तस्योपवर्ण्यते प्रकृतयः सर्वाः संनोभाग्यतनिवर्तकः २ अभिव्यज्यमानानि भगवल्लक्षणानि पादतला
दिषु वज्राङ्कुशादीनि यस्य महाविभूतिः सर्वैश्वर्यसंपत्तिः अणिमादिभिः प्रकृतयो मात्यादयः जगृधुः अभिकां
क्षंति स्म ॥ १ ॥

तत्र आग्नीध्रीये शकलाया वरं ददामि आत्मतुल्यमनुपलभमानः १९ इति निशामयंत्या मेरुदेव्याः
पतिमभिधायान्तर्दधे भगवान् २० बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान्परमर्षिभिः प्रसादितो ना
भेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान् दर्शयितुकामो वातरशनानां श्रमणानामृ
षीणामूर्ध्वमंथिनां शुक्लया तन्वावततार २१ इति श्रीभागवते महापुराणे पंचमस्कंधे तृ
तीयोऽध्यायः ३ श्रीशुक उवाच अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशम
वैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनि
तलसमवनायातितरां जगृधुः १ तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा ब
लेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार २ तस्य हीन्द्रः स्पर्धमानो भग
वान्वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं
नामाभ्यवर्षत् ३ ॥ ॥

वर्ष्मणा देहेन तस्य विशेषणं वरीयसा श्रेष्ठतमेन बृहच्छ्लोकाः पद्यानि कवीनां यस्मिन् तेन च ओजस्तेजः वीर्यं प्रभावः शौ १०
र्यं ... ऋषभ इति नाम चकार २ तस्य वर्षे मंडले ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दर्शनेनैव कृतार्था अपि वरमेकं प्रार्थयामहे अथेति स्मरणाय विवशानां नोऽस्मर्तॄणामनः १२ अस्य च प्रार्थनीयमस्तीत्याहुः किंचेति आ
शिषामीश्वरं स्वर्गापवर्गयोरपीश्वरं त्वामुपधावति प्रजायामेव पुरुषार्थ इति प्रत्ययो यस्य अधनो यथा फलीकरणं तुषकणादि
कमाशासानो धनदमुपधावति १४ इदं च नातिचित्रमित्याहुः इह संसारे तेऽपराजितया मायया अनवसितपदव्या अलक्षितमार्गया अ
पराजितः को वा न कोऽपि अनावृतमतिः कः अनावृतमतिर्विषयविषरयेणानावृतप्रकृतिर्यस्य सः कः अनुपासि
तमहच्चरणः अतस्त्वन्मायया मोहितस्यैवमाशासाधनत्वं यत्र एषः १५ अदभ्रकर्तः हे बहुकार्यकारिन् अल्पीयसे कार्याय त्वस्मा

अथ कथंचित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशाया
मपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु १३ किंचायं रा
जर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्र
जायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् १४ को वा इह तेऽपराजितोऽपराजितया मायया
ऽनवसितपदव्या नावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः १५ यदु ह वा
व तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्ये
न सर्वान्प्रतिवोढुमविदुषाम् १६ इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधरा
भिवादिताभिवन्दितचरणः सदयमिदमाह १७ ॥ श्रीभगवानुवाच अहो बताहमृषयो भव
द्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममा
हमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद्द्विजदेवकुलम् १८

दिह समाहूतोऽसि तत्र प्रजायामर्थधीर्येषां मन्दानां नेषां नो यद्देवहेलनमवज्ञानं तत्सर्वान्प्रति नवसाम्येन सहनमा प्रतिवोढु
मर्हसि १६ इति निगदेन गद्यात्मकस्तोत्रेणाऽवर्षधरो भारतवर्षपतिर्नाभिः तेनाभिवादितस्तापेक्ष्य लिङ्गस्तैरभिवन्दितौ चरणौ यस्य
१७ असुलभत्वे हेतुः ममाहमेवाभिरूपः सदृशः कैवल्यात् अद्वितीयत्वात् द्विजकुलमेवाद्य ब्राह्मणास्तेषां कुलम् १८ ॥

नृपनंतरं कविप्रमुखानव भागवतधर्मप्रदर्शकाः वसुदेवनारदयोः संवादोपक्षिन् उपरीक्ष्यन्त एकादशस्कंधे ११ महाशालीनाश्च निविनीताः १२ केवलः शुद्धः विपरीतवत् अनीश्वरवत् कर्माणि कुर्वन् नियमयन् नियमितवान् यतं नो नित्यतामात्म पर कर्मकरणे हेतुः अनुगतमुत्सन्नं धर्मं स्वयमाचरणेनातद्विदामुपशिक्षयन् कथं धर्मादीनामवरोधेन तत्राह उदा नंदो भोगः आत्मनो नुः १३ शीर्षण्यः श्रेष्ठः तेनाचरितं तत् जनो नुवर्तते यतः १४ सकलो धर्मोपनिषत् ब्राह्मणं ह वेदरहस्यम् यद्यपि स्वेनैव विदितं तथापि ब्राह्मणोक्त पथैव गतवानित्यर्थः १५॥

कविर्हरिरन्तरीक्षः प्रबुद्धः पिप्पलायन आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः इति भागवतधर्मेश नान् नव महाभागवतान् लोके यांश्चरितं भगवन्महिमोपबृंहितं वसुदेवनारदसंवादमुपशमायनम् परिष्टाद्वर्णयिष्यामः ११ यवीयांस एकाशीतिर्जायन्तेयाः पितुरादेशकरा महाशालीना महाश्रो त्रियाः यज्ञशीलाः कर्मविशुद्धा ब्राह्मणा बभूवुः १२ भगवान् ऋषभसंज्ञ आत्मतंत्रः स्वयं नित्य निवृत्तानर्थपरंपरः केवलानंदानुभव ईश्वर एव विपरीतवत् कर्माण्यारभमाणः कालेनानुगतं धर्ममाचरणेनोपशिक्षयन्नतद्विदां सम उपशांतो मैत्रः कारुणिको धर्मार्थयशः प्रजानंदामृ तावरोधेन गृहेषु लोकं नियमितवान् १३ यद्यच्छीर्षण्याचरितं तत्तदनुवर्तते लोकः १४ यद्यपि स्वविदितं सकलधर्मं ब्राह्मं गुह्यं ब्राह्मणैर्दर्शितमार्गेण सामादिभिरुपायैर्जनतामनुशशास १५ द्र व्यदेशकालवयःश्रद्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इया ज १६ भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमानमिवात्म नोऽन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्तर्यनुसवनं विजृंभितस्नेहातिशयमंतरेण १७

द्रव्यादिभिरुपचितैर्यज्ञैरिष्टवान् तत्र च यौवन मधुवैव धर्ममन्विच्छेदिति वचनात् विविधोद्देशाः नानादेवतोद्देशाः यथोपदे शं यथाविधि १६ अन्यस्मात् सर्वोशात्मनः कोऽपि किमपि कथंचनापि नवांछति रथ्यानुदये ढ्छतः अविद्यमानं खपुष्पा दिकमिव वचनात् यदीयमवेक्षते ऽपीत्यर्थः भर्तरि ऋषभदेवे प्रतिक्षणं मुहूर्तं सितस्नेहोद्रेकं विना अन्यत्र वांछति ॥१७॥ श्री

अवरुध्य प्राप्य स्वैरमि-स्यपा उत्तिलो नरलोकसमानधर्मा मनुष्याकारो येन नमस्त एवमापवास्य पुत्ररनि विलसिता मति
कस्य ४ आपौरप्रकृति पौरान् प्रकृतीः अभिव्याप्य विदितो नृत्तो गोप मिन कर्म तो नाभिः जनपदः जनाः पौराद्यः पदं प्रमाणं यः
स्यसः आत्मजं धर्ममर्यादा हृता एमभिषिच्य प्रोक्तए नानुसंगनि ५ पवित्रशाला कावदरी काश्रमे प्रसन्ने परानुवेजकनिपु
णं च तीव्रं तेन उपासीनः सेवमानः कालेन तन्महिमानं जीवन्मुक्तिमवाप ५ नाभेः तनप्रसिद्धं कर्म अनुतदनन्तरं कोपुमा
नाचरेत् न कोपि स्पष्टः ॥ ६ ॥ ॥ ॥

नाभिस्तु यथाऽभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीत
नरलोकसधर्मं भगवंतं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालय
न् परां निर्वृतिमुपगतः ४ विदितानुरागमापौरप्रकृतिजनपदो राजा नाभिरात्मजं समयसेतुरक्षाया
मभिषिच्य ब्राह्मणेषूपधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारा
यणाख्यं भगवंतं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ५ यस्य ह पांडवेय श्लोकावुदाहर
ंति कोनु तत्कर्म राजर्षेर्नाभेरन्वाचरेत्पुमान् अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ६ ब्रह्मण्यो
ऽन्यः कुतो नाभेर्विप्रा मंगलपूजिताः यस्य बर्हिषि यज्ञेशं दर्शयामासुरोजसा ७ अथ ह भगवानृष
भदेवः स्ववर्षं कर्मक्षेत्रमनुमन्यमानः प्रदर्शितगुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां ध
र्माननुशिक्षमाणो जयंत्यामिंद्रदत्तायामुभयलक्षणं कर्म समाम्नाताम्नातमभियुंजन्नात्मजानामात्मस
मानानां शतं जनयामास ८ येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुणः आसीन् येनेदं वर्षं भार
तमिति व्यपदिशंति ९ तमनु कुशावर्त इलावर्तो ब्रह्मावर्तो मलयः केतुर्भद्रसेन इंद्रस्पृग्विदर्भः कीक
टः इति नव नवति प्रधानाः १०

मंगलैर्दक्षिणाभिः पूजिताः ततः ओजसा मंत्रबलेन ७ अन्येषां गुरुकुलवासप्रदर्शिनो गुरुकुलवासो येन अनुशिक्षमाणः अनुति
ष्ठन् उभयं पवित्रियं विरुद्धं सिलक्षणं कर्म विधिमभियुंजन् अनुतिष्ठन् जयंत्यां आत्मसमानानां गुणतैजनयामासे ८ ॥

[illegible] नवतिः प्रधानाः [illegible] १०॥

भा० पं० १२

उक्तमुपसंहरति एवं पूर्वं तत्तत्कर्म कार्यं मृतं मनः कर्मसक्तं वशं प्रयुंक्ते इदं पुनः कर्माणि च करोतीति जीवन्मुक्तो कर्मस्यात्स्वार्थमाह
अविद्ययेति अविद्यया आत्मनि उपधीयमाने आच्छाद्यमाने सति एवं मनः कर्तृ पुनर्बन्धकं कर्मवशं प्रयुंक्ते इदं न केवलं देहयोगमात्रमनर्थहेतुः
...तत्र तापान् प्राप्नोतीति... प्रत्येकं तयोः
...हृदयग्रंथिरत्यैव... स्थूलमन्यं हृदयग्रंथिं बुधैर्वदन्ति...

एवं मनः कर्मवशं प्रयुंक्ते अविद्ययात्मन्युपधीयमाने प्रीतिर्न यावन्मयि वासुदेवे न मुच्यते देहयो
गेन तावत् ६ यदा न पश्यत्ययथा गुणेहां स्वार्थे प्रमत्तः सहसा विपश्चित् गतस्मृतिर्विन्दति तत्र
तापानासाद्य मैथुन्यमगारमज्ञः ७ पुंसः स्त्रिया मिथुनीभावमेतं तयोर्मिथो हृदयग्रंथिमाहुः अ
तो गृहक्षेत्रसुताप्तवित्तैर्जनस्य मोहोऽयमहं ममेति ८ यदा मनो हृदयग्रंथिरस्य कर्मानुबद्धो
दृढ आश्लथेत तदा जनः संपरिवर्तते स्मान्मुक्तः परं यात्यतिहाय हेतुं ९ हंसे गुरौ मयि भ
क्त्यानुवृत्या वितृष्णया द्वन्द्वतितिक्षया च सर्वत्र जन्तोर्व्यसनावगत्या जिज्ञासया तपसेहानिवृ
त्त्या १० मत्कर्मभिर्मत्कथया च नित्यं मद्देवसंगाद्गुणकीर्तनान्मे निर्वैरसाम्योपशमेन पुत्रा जिहा
सया देहगेहात्मबुद्धेः ११ अध्यात्मयोगेन विविक्तसेवया प्राणेन्द्रियात्माभिजयेन सध्र्य
क् सच्छ्रद्धया ब्रह्मचर्येण शश्वदसंप्रमादेन यमेन वाचाम् ॥ १२

...ममेति मोहः अस्मान्... यदा मनो हृदयग्रंथिः... तदा स्मान्मुक्तः...
...पंचविंशतिसाधनान्याह... नित्यं... व्यसनावगत्या दुःखानुसंधानेन...

१२

अवहितात्मनः संयन्त्रितान् अपि प्रजानुशासनार्थम् उपशिक्षयन्न् इति ह वदस्माह उवाच १९ इति पंचमे टीकायां चतुर्थोऽध्यायः ॥४॥

पंचमे मोक्षधर्मोपदेशः पुत्राननुशासन् ऋषभो जगौ ... नायं देहो ... दुःखदान् कामान् ... देहभाजां ... तपसा ... ब्रह्म सौख्यं ... १ ...

... महत्सेवाम् इति तमसः ... योषितां संगिनां संगं ... महतां लक्षणमाह समचित्ताः ... सदाचाराः २

स कदाचिद् अटमानो भगवान् ऋषभो ब्रह्मावर्तगतो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयन्तीनाम्
आत्मजान् अवहितात्मनः प्रश्रयप्रणयभरसुयन्त्रितान् अप्य् उपशिक्षयन्न् इति होवाच १९ इति श्री
भागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते चतुर्थोऽध्यायः ४ ऋषभ उवाच
नायं देहो देहभाजां नृलोके कष्टान् कामान् अर्हते विड्भुजां ये तपो दिव्यं पुत्रका येन सत्वं श
ुद्ध्येद् यस्माद् ब्रह्मसौख्यं त्व् अनंतम् १ महत्सेवां द्वारम् आहुर् विमुक्तेस् तमोद्वारं योषितां संगिसंग
म् महांतस् ते समचित्ताः प्रशांता विमन्यवः सुहृदः साधवो ये २ ये वा मयीशे कृतसौहृदार्था जनेषु देहं
भरवार्तिकेषु गृहेषु जायात्मजरातिमत्सु न प्रीतियुक्ता यावदर्थाश् च लोके ३ नूनं प्रमत्तः कु
रुते विकर्म यद् इंद्रियप्रीतय आपृणोति न साधु मन्ये यत आत्मनोऽयम् असन्न् अपि क्लेशद आस
देहः ४ पराभवस् तावद् अबोधजातो यावन् न जिज्ञासत आत्मतत्वम् यावत् क्रियास् तावद् इदं म
नो वै कर्मात्मकं येन शरीरबंधः ५

... लक्षणं दर्शयति ... मयीशे ... अर्थः ... यावदर्थाः ... कामान् ... विकर्म ... इंद्रियप्रीतये आपृणोति ...

एवं मोक्षधर्माननुपदिश्य भरतशुश्रूषणलक्षणं धर्मं स्वपुत्रेभ्यो दिदिक्षन्नात्मनः सर्वोत्कर्षमाह द्वाभ्याम् इदं मनुष्याका
रं शरीरं मम दुर्विभाव्यं मया विना केनापि दुर्लक्ष्यं विलसितं न त्वहं प्राकृतो मनुष्य इत्यर्थः मे हृदयं न त्वहं किंतु हृदयं यत्र धर्मस्त
त्स्वरूपं सत्त्वमित्यर्थः कृतः पश्चात्कृतः यः अधर्मो दूरादेव पृष्ठे कृतः उत्सारितः अतो हि मामार्या ऋषभं प्राहुः १९ भवंतस्तु हृदये
न शुद्धसत्त्वमयेन जाताः तस्माद्भवंतस्तं भरतमेव सनाभं भ्रातरं भजध्वं ननु नः सुतत्वात् कथं तं भजेमहि तत्र महीयांसं
[illegible] २० [illegible]
[illegible]

इदं शरीरं मम दुर्विभाव्यं न त्वं हि मे हृदयं यत्र धर्मः पृष्ठे कृतो मे यदधर्म आरादतो हि माम
ऋषभं प्राहुरार्याः १९ तस्माद्भवन्तो हृदयेन जाताः सर्वे महीयांसममुं सनाभम् अक्लिष्टबुद्ध्या
भरतं भजध्वं शुश्रूषणं तद्भरणं प्रजानाम् २० भूतेषु वीरुद्भ्य उदुत्तमा ये सरीसृपास्तेषु सबोध
निष्ठाः ततो मनुष्याः प्रमथास्ततोऽपि गन्धर्वसिद्धा विबुधानुगा ये २१ देवासुरेभ्यो मघवत्प्र
धाना दक्षादयो ब्रह्मसुतास्तु तेषाम् भवः परः सोऽथ विरिञ्चिवीर्यः स मत्परोऽहं द्विजदेवदे
वः २२ न ब्राह्मणैस्तुलये भूतमन्यत्पश्यामि विप्राः किमतः परं तु यस्मिन्नृभिः प्रहुतं श्रद्धया
ऽहमश्नामि कामं न तथाग्निहोत्रे २३

उत्त उच्चैः अतिशयेनोत्तमाः तेभ्योऽपि ये सरीसृपाः सर्पन्तीति जंगमाः ते उदुत्तमा इति सर्वत्रानुषंगः तेष्वपि सबोधा निष्ठा स्थितिर्येषां
पश्वादीनां ते कीटकादिभ्यः ततः तेष्वपि मनुष्याः ततोऽपि प्रमथाः भूतप्रेतादयः ततोऽपि गंधर्वाः ततः सिद्धाः ततोऽन्ये विबुधा
नुगाः किन्नरादयः २१ तेभ्योऽसुराः देवासुरेभ्यः सकाशात् इत्यर्थः देवाश्च भगवत्प्रधानाः देवेभ्य इन्द्रः श्रेष्ठ इत्यर्थः ततोऽपि ब्रह्मसुता दक्षा
दयः तेषां मध्ये भवः परः श्रेष्ठः स भवो विरिंचवीर्यः विरिंचस्य वीर्यं शक्तिः कोऽसौ यस्य स विरिंचवीर्यः अतस्तज्जनकत्वाद्विरिंचस्त
तः परस्त्वर्थः स विरिंचो मत्परः अहं परो यस्य द्विजदेवा ब्राह्मणास्ते च देवाः परं स्यापदस्य सोऽहम् २२ ब्राह्मणैस्तुल्यमन्यद्भूतं न तुलये सं

[illegible]

१३

13

योगेन समाधिना ॥ छ ॥ सप

सर्वत्र समभावना तत्त्वविचक्षणोन निपुणेन विज्ञानविराजितेन अनुभवपर्यन्तेन ज्ञानेन [illegible] ॥ १३ ॥ ततः [illegible] कर्मण्यारोपतव

मतलपुरुः धैर्य अपरम विवेके धैर्यः सन्न कं [illegible] परमः [illegible] पातेन [illegible] ॥ १४ ॥ किंच प

[illegible] परमः [illegible] मम लोके पः [illegible] सनुजः [illegible]

[illegible] अनेन ज्ञानेन तत्त्वविदुषः [illegible] ॥ १५ ॥ न योजनं [illegible] लो

[illegible] योजन [illegible] संसारकूपे पातपतितस्य मनुजः [illegible]

सर्वत्र समभाव विचक्षणोन ज्ञानेन विज्ञानविराजितेन योगेन [illegible] लिंगं स्वपोर्ह

सर्वत्र समभाव विचक्षणोन ज्ञानेन विज्ञानविराजितेन योगेन [illegible] ततः अनेन योगेन प

[illegible] ॥ १३ ॥ कर्माण [illegible] विधवासादित [illegible] लोककामेन सर

वोपदेश सम्यक् [illegible] परमेन योगात् ॥ १४ ॥ पुत्रो [illegible] लोककामेन [illegible] योजयन्मनुजो

नुजस्तार्थः [illegible] ज्ञानं योजये कर्मसु कर्मस्थान [illegible] योजन मनिदेतत्ति

[illegible] निपात [illegible] ॥ १५ ॥ लोकः [illegible] परिपतिन [illegible] योन समिदेत्ततिविपर

कामकामः [illegible] ॥ १६ ॥ [illegible] योजन [illegible] ॥ १७ ॥

[illegible] पुनः संसारः [illegible] योज [illegible] पतिस्व लस्वान

[illegible] देवेन [illegible]

मोक्षपदं समुपैति मनुजः ॥ १८ ॥

[illegible] पन्नाः [illegible] ॥ १६ ॥ [illegible] योज [illegible] मोच

[illegible] ॥ १७ ॥ [illegible] पितानस्य

[illegible] ॥ १८ ॥

[illegible] देवदेव [illegible]

भा० पं०
१४

योऽंशस्तेन दैर्घ्य एव ह्रसंति न तून्नत्वे पृथुत्वे वा यदुक्तं विष्णुपुराणे लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापर इति एत
च्चोत्सेधलक्ष्यैवोक्तं तयोरपि यावन्मध्ये मत्वाभावेन लक्षप्रमाणत्वाभावात् ॥ ८ ॥ ॥ ॥ ॥ ॥ शिव०
श्री श्री श्री शिव०

ष्टवोंकेशवसिं ध्यादिमानंकृत्यञ्चत्रयपतः स्यंप्रवकुमारध्यापं चाध्यापीतः परं प्रोक्तो: ध्यसधाचोध्येपीतः सत्त्रिवेनातः
मेरोः स्थितिर्मूर्तिकंतकर्णो काचोपवर्ण्यते प्रियव्रतेनचारित्रौ कुर्वन्कृतौ वापादिकल्पनी तद्दिशेष विजिज्ञासुः कर्षान्तेपीव
ष्टमि उक्त इति किंपर्यंतमुक्तः तदाह यावदादित्यस्तपतिपत्रचासौ ज्योतिषांगणैः सह चंद्रमावाद्दृश्यते १

राजोवाच उक्तस्त्वयाभूमंडलायामविशेषो यावदादित्यस्तपति यत्रचासौ ज्योतिषांगणैश्चंद्रमावासहदृ
श्यते १ तत्रापिप्रियव्रतरथचरणपरिखातैः सप्तभिः सप्तसिंधवः उपक्लृप्ताः यतः एतस्याः सप्तद्वीपविशे
षविकल्पस्त्वयाभगवन्खलुसूचितः एतदेवाखिलमहंमानतोलक्षणतश्चसर्वंविजिज्ञासामि २ भगवतो
गुणमयेस्थूलरूपआवेशितंमनोह्यगुणेपिसूक्ष्मतमआत्मज्योतिषिपरेब्रह्मणिभगवतिवासुदेवाख्येक्षमम्
आवेशितुंतदुहैतद्गुरोर्हस्यनुवर्णयितुमिति ३ ऋषिरुवाच नवैमहाराजभगवतोमायागुणवि
भूतेः काष्ठांमनसावचसावाधिगंतुमलंविबुधायुषापिपुरुषस्तस्मात्प्राधान्येनैवभूगोलक
विशेषंनामरूपमानलक्षणतोव्याख्यास्यामः ४ योवायंद्वीपः कुवलयकमलकोशाभ्यंतरकोशो
नियुतयोजनविशालः समवर्तुलोयथापुष्करपत्रं ५

ततः षोडशे सिंधुभ्यः सन्निवेशोभुवः स्फुटं सुमेरोर्वर्णितःसंक्षेपतोदर्शितः २॥ ३॥ जिज्ञासायाः फलमाह भगवत इति मायागु
णविभूतेस्तस्याः काष्ठांप्रत्यंतंरूपंसन्निवेशलक्षणंचेति ४ कुवलयंभूमंडलंतदेवकमलंतस्यकोशाः सप्तद्वी
पाः तेष्वभ्यंतराः कोशः प्रथमोजंबूद्वीपः नियुतयोजनविशालः लक्षयोजनविस्तीर्णः ५॥ ॥ ॥

भा०पं० यदुपस्पर्शिनः यत्सेविनः १४ ॥१५॥ ललामेति सुरललनानां मध्ये ललामभूता श्रेष्ठास्तेषां यूथपतयः सह संभूय विहरंति १६ एकादशशतयोजनमुत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणमुक्तं वा गिरिशिखरवत् स्थूलानि अमृतकल्पानि पतंति
टी० १६ एकादशशतयोजनमुत्तुंगो यो देवचूतस्तस्य शिरसः सकाशात् फलप्रमाणमुक्तं वा यदुपरागेण अरुणोदा नाम नदी १७ अतिमधुरसुरभिसुगंधि
स्वच्छा वै...कषब्यधिकानि च फलप्रमाणमाव्यतिरिक्ततवदर्शिभिरिति १७ अतिमधुर...सुरभि

ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजला यदुपस्पर्शिन उपदेवगणा योगैश्वर्याणि स्वाभाविकानि भरतर्षभ धारयंति १४ देवोद्यानानि च भवंति चत्वारि नंदनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति १५ येष्वमरपरिवृढाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरंति १६ मंदरोत्संग एकादशशतयोजनोत्तुंगदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतंति १७ तेषां विशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुणरसोदेनारुणोदा नाम नदी मंदरगिरिशिखरान्निपतंती पूर्वेणेलावृतमुपप्लावयति १८ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगंधवातो दशयोजनं समंतादनुवासयति १९ एवं जंबूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन जंबूनाम नदी मेरुमंदरशिखरादयुतयोजनादवनितले निपतंती दक्षिणेनात्मानं यावदिलावृतमुपस्यंदति २० ॥ ॥

भवन्यश्च अन्येषां जंबूद्वीपवासिनः बहुलश्चासावरुणश्चासौ रसः स एव उदकं तेन १८ यदुपजोषणात् यस्य सेवनात् १९ अनस्थिप्रायाणामल्पबीजानां अत्युच्चनिपतनात् विशीर्णानां आत्मानं दक्षिणतः सर्वमिलावृतं व्याप्य वहतीत्यर्थः ॥२० ॥ श्री

॥ श्री श्री श्री श्री श्री ॥ ॥ ॥ ॥ ॥ शि०

अयुतयोजनं उत्सेधः उच्छ्रायो येषां अयं चोत्सेधो नीलादीनामपि द्रष्टव्यः नीलादिषु प्रत्येकं चोत्सेधमपि द्रष्टव्यं पर्याल-
व्यमर्यादागिरय इति शेषः ८ आनीलनिषधायतौ उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तं च दीर्घौ पप्रथतुः विस्तीर्णौ भवतः १० तावेव केतु-
मालभद्राश्वयोर्वर्षयोः सीमानं कुर्वाते ११ मन्वेवं सति पूर्वापररेखायामिलावृतवेष्टितो मेरुर्न स्यात् ततः पूर्वापरतो गिरिद्वयं वर्षद्वयं चेना-
नः किंचिद् दक्षिणोत्तररेखायां तु तथैवेलावृतवेष्टितो [illegible] मेरुः ... [illegible] तत्कथं सर्वतो लक्ष-
प्रमाणं जंबूद्वीपस्य उच्यते इति षोडशसहस्राणि लवितः [illegible] इलावृतस्याष्टादशभ्यो योजनेभ्यः पंचाशत् सहस्राणि द्वादशोत्सेधं

एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्से-
धा हरिवर्षकिंपुरुषभारतानां यथासंख्यं तथैवेलावृतमपरेण पूर्वेण च माल्यवद्गन्धमादनावा-
नीलनिषधायतौ द्विसहस्रं पप्रथतुः १० केतुमालभद्राश्वयोः सीमानं विदधाते ११ मंदरो मेरुमंदरः
सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टंभगिरय उपक्लृप्ताः १२ चतुर्ष्वे-
तेषु चूतजंबूकदंबन्यग्रोधाश्चत्वारः पादपप्रवराः पर्वतकेतव इवाधिसहस्रयोजनोन्नाहा-
स्तावद्विटपविततयः शतयोजनपरिणाहाः १३

दक्षिणोत्तररेखायां तावज्जंबूद्वीपः पूर्वापररेखायामपि ल[illegible] मेरोरिलावृतस्य चतुस्त्रिंशत्सहस्राणि शेषाणि द्विषष्टिसहस्राणि
पूर्वापरवर्षयोरासमुद्रं दैर्घ्यं द्रष्टव्यानि अतो नान्योन्यविरोधः अयुतयोजनप्रमाणो विस्तारो प्रोत्सेधो येषां विस्तीर्णत्वं मेरोराव-
ष्टंभकत्वात् सर्वं पाश्चिमोगिरिर्दक्षिणोत्तरविस्तारो दक्षिणोत्तरो च पूर्वापरविस्तारो द्रष्टव्यो सर्वतो दशयोजनसहस्रं विस्तारं
गीकारे त्विलावृतलोकात्सर्वेणेलावृतमुपष्टावयतीत्यादि विरोधः स्यात् १२ अधिसहस्रमेकादशशतानि उन्नाहो येषां तावन्त्रमा-
णं विटपविततयो येषां शतयोजनं परिणाहो विस्तारो येषां १३॥

भा० पं०
टि०

२८ यथादिशं प्राच्यादिदिक्षु यथारूपं इन्द्रादिवर्णानतिक्रमेण तुरीयमानेन सार्धद्विसहस्रप्रमाणेन नामानि पुराणान्तराज्ज्ञातव्यानि यथोक्तं मेरौ नवपुराणि
निसृष्टमेरोवत्यमरावती तेजोवती संयमिनी च यथाक्रमं भगनापरा कृष्णाङ्गनावती गन्धवती तथाऽन्या महोदया यशोवती चन्द्रलेखत्यादीनां यथाक्रममिति
३० पंचमे षोडशः ततः सप्तदशे गंगागमनं ... वर्ण्यते रत्नावृत्ते चतुर्भागे केषु ... यज्ञलिंगस्य वर्णयते तिलिंगं त्रिविक्रममूर्तिं यस्य विक्रमतः द
क्षिणेन पदा भुवं क्रान्त्वा वामपदमुत्क्षिपतः वामपादांगुष्ठनखेन निर्भिन्नमूर्ध्वमुपरिभागो यस्यांडकटाहस्य तस्य विवरेणांतः प्रविष्टा या बाह्यजलधा

३८

मेरोर्मूर्धनि भगवत आत्मयोनेर्मध्यतउपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति २८
तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः २९ इति श्रीभागवते
महापुराणे पंचमस्कंधे भुवनकोशवर्णनं नाम षोडशोऽध्यायः १६ ॥ श्रीशुक उवाच तत्र भगवतः साक्षाद्य
ज्ञलिंगस्य विष्णोर्विक्रमतो वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतः प्रविष्टा या बाह्यजल[illegible]
धारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलापहोपस्पर्शनामला साक्षा
द्भगवत्पदीत्यनुपलक्षितवचोऽभिधीयमानातिमहता कालेन युगसहस्रोपलक्षणेन दिवो मूर्ध
न्यवततार १ ॥ ॥ ॥

रा सा दिवो मूर्धन्यवततारेत्यन्वयः तस्य यच्चरणपंकजं तस्यावनेजनं क्षालनं तेन अरुणं तद्गतं कुंकुमं तदेव किंजल्कः तैरुपरंजिता अत एवाखिलस्य
जगतोऽघमलापहमुपस्पर्शनं यस्याः तथाप्यमला न तु मलसंगमः ... साक्षाद्भगवत्पदीति पदनुलक्षितं जाह्नवीभागीरथीत्याद्युपलक्षणं
नत्वरक्षितं वचो नाम तेनाभिधीयमाना ॥१॥ ॥ ॥ ॥ ॥ शिव०

३८

तावत सर्वतः तोयस्पोसरयोः २१॥ २२॥ आयामो त्र व्यामः "सच व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगुन्नतयोर्नितम्बकूलक्षणः पंच व्याम
परिणाहः स्थौल्यं यासामित्यर्थः केचित्तु पंचव्याम परिणाहा इत्येव पठंति २४ नीचीना अधोमुखाः २५॥ २६॥ चतुर्द्दिक्षु मेरु [illegible]

तावदुभयोरपि रोधसोर्या मृत्तिका रसेनानुविध्यमाना वायुर्कसंयोगविपाकेन सदामरलोकाभरणं
जंबूनदं नाम सुवर्णं भवति २१ यद् [illegible] ह वाव विबुधादयः सह युव[illegible]तिभिर्मुकुटकटिसूत्राद्याभर
णरूपेण खलु धारयंति २२ यस्तु महाकदंबः सुपार्श्वनिरूढो यास्तस्य कोटरेभ्यो विनिःसृताः पंचायामप
रिणाहाः पंचमधुधाराः [illegible]
[illegible] सुपार्श्वशिखरात्पतंत्योपरेणात्मानमिलावृतमनुमोदयंति २३ या ह्युपयुंजानानां मुखनिर्वासि
तो वायुः समंताच्छतयोजनमनुवासयति २४ एवं कुमुदनिरूढो यः शतवल्शो नाम वटस्तस्य स्कंधे
भ्यो नीचीनाः पयोदधिमधुघृतगुडान्नाद्यंबरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कु
मुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति २५ यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलि
तक्लमस्वेददौर्गंध्यजरामयमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवंति यावज्जीवं सुखं नि
रतिशयमेव २६ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनीवासकपिलशंखवैडूर्य
जारुधिहंसऋषभनागकालंजरनारदादयो गिरयो मेरोः कर्णिकाया इव केसरा मूलदेशे परीत उपक्लृप्ताः १
जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुंगौ भवतः एवमपरेण पवनपा
रियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृंगमकरौ अष्टभिरेतैः परिसृतोऽग्निरिव परित
श्चकास्ति कांचनगिरिः २८

लायोजनसहस्रसंख्याकाः परितः परितोऽपि स्वजठरदेवकूटादयस्तिष्ठंति २७ मेरोरष्टादशयोजनसहस्रप्रमाणेनायामोक्तेर्वैलक्षण्यादि [illegible]
परिमाणादिपक्षतः अन्यथा च वर्णितं तत्तु कल्पभेदापेक्षया द्विसहस्रं पृथुत्वं तुंगत्वं च॥ २८॥

भा० पं० टि०

अभिस्यंदती अभिनोगच्छंती ५ केसराचलानां मेरुसमानां दृष्टपतितानां मूर्धसु तेषां मादिशिखरेषु मस्तकेषु गंधमादनपतित्वा ततस्तेभ्योऽधोऽधः प्रस्रवंती सती इदं माल्यवच्छिखरात् ततनु केतुमालाभिमुखं निष्पतंती वक्षुः संज्ञा ७ गिरिशिखराद्गिरिशिखरमिति कुमुदशिखरात् द्वेलितानी लशिखरं ततनु उच्चलिता श्वेतशिखरं तदप्यतिहाय शृंगवतः शृंगात् स्रवंती ॥ ८ ॥ ॥ ॥

३६

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदती नदनदीनदीपतिमेवाभिनिविशति ५ सीता
लकनंदा चक्षुर्भद्रेति सीतातु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्योधोधः प्रस्रवंती गंधमादनमू
र्धसु पतित्वांतरेण भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ६ एवं माल्यवत्शिखरान्नि
ष्पतंती ततनुपरतवेगा केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ७ भद्रा चोत्तरतो मेरु
शिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृंगवतः शृंगादवस्यंदमाना उत्तरांस्तु कुरू
न्भित उदीच्यां दिशि जलधिमभिप्रविशति ८ तथैवालकनंदा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरि
कूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यतिरभसतररंहसा लुठयंती भारतमभिवर्षं दक्षिणस्यां दिशि जल
धिमभिप्रविशति ९ यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेश्वमेधराजसूयादीनां फलं न दुर्लभम
मिति अन्ये च नदा नद्यश्च वर्षे वर्षे संति बहुशो मेर्वादिगिरिदुहितरः शतशः १० तत्रापि भारतमेव वर्षं
कर्मक्षेत्रमन्यान्यष्ट वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि स्वर्गपदानि व्यपदिशंति ॥११॥ ॥

३९

अतिरभसतररंहसा अत्यसवल्लितीव्रतरवेगेन ९ बहुशः बहुविधाः मेर्वादिगिरिशिलां दुहितरः तत्प्रसूताः १० दिव्यभौमविलभेदात्
त्रिविधः स्वर्गः तत्र भौमस्वर्गस्य पदानि स्थानानि व्यपदिशंति ॥ ॥ ॥ ॥ ॥

शि० ०

३६

के॥सादिवोमूर्धानमात्स्यपदीति॥ किं तद्विष्णुपदं तदाह यत्रेति वीरव्रतः दृढसंकल्पः अस्मत्कुलदेवतायाः हरेश्चरणारविंदोदकमिति
हेतोः परमादरेण बिभर्तीत्यन्वयः कथंभूतः अनुप्रतिदिनं वर्धमानेन भगवद्भक्तियोगेन दृढमत्यंतं क्लिद्यमानमंतर्हृदयं यस्य अत
एव औत्कंठ्येन विवशमामीलितं यल्लोचनयुगलं तदेव कुड्मलं तस्माद्विगलितममलं बाष्पं तस्य कलया सह अभिव्यज्यमान
रोमपुलकानां कुलं यस्य २ ततः सप्तर्षयस्तत्प्रभावाभिज्ञाः संतो यां जटाजूटैरुद्वहंतीत्यन्वयः एतावत्येवातो

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोऽस्मत्कुलदेवताचरणारविंदो
दकमिति यामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेन क्लिद्यमानांतर्हृदय औत्कंठ्यविवशामीलि
तलोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलककुलकोऽधुनापि परमाद
रेण शिरसा बिभर्ति २ ततः सप्तर्षयस्तत्प्रभावाभिज्ञा यां ननु तपस आत्यंतिकी सिद्धिरेतावती भगव
ति सर्वात्मनि वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमु
क्षव इव सबहुमानमद्यापि जटाजूटैरुद्वहंति ३ ततोऽनेकसहस्रकोटिविमानानीकसंकुलदेव
यानेनावतरंतींदुमंडलमावार्य ब्रह्मसदने निपतति ४॥

धिकात्यंतसिद्धिः प्राप्यं वेति तत्र हेतुः भगवति सततं भक्तियोगलाभेनैवोपेक्षिता अन्ये पुरुषार्था आत्मज्ञानं च यैः कामिव कस्य यथा
रपंति प्रत्यक्षं मुक्तिमिवतामागतां मुमुक्षवो जना इवेति ३ ततोऽनेकसहस्रकोटीनां विमानानामनीकैः संकुलेन देवयानेन आकाशमा
र्गेणावतरंती सप्तर्षिभ्योऽर्वाग्वायुप्राप्रदेशः कर्णिकागिरिरिति ततोऽर्वाग्जेवसंकुलमंडलं आवार्य आप्लाव्य मेरुमूर्धस्थे ब्र
ह्मसदने निपतति ४॥ ॥ ॥ ॥ ॥ ॥

भा०पं०
टि०

नवस्वपिवर्षेषु पुरुषाणां तदनुग्रहाय सन्त्वानोवत्स्यमाणोन गात्मतत्त्वदर्थं आत्मनस्तत्त्वव्यूहेन स्वमूर्त्तिभेदेन संनिधीयते सं
निहितो भवति १४ अपरः अर्वाचीनः पश्चान्नवमस्कंधे १५ भवानीनाथैः स्त्रीगणानामर्बुदसहस्रैरवरु
ध्यमानः सर्वतः सेव्यमानः आत्मनः प्रकृतिं कारणं आत्मनि समाधिध्यानेन यद्ध्यानेन रूपेण एतद्वक्ष्यमाणं मंत्रादिकं अभिगृ
णन् जपन् १६ सर्वेषां गुणानां संख्यानं प्रकाशो यस्मात् स्वयं तु अव्यक्तः अप्रमेयाय १७ हे भजन्य भजनीयपद्मालं

४०

नवस्वपिवर्षेषु भगवान्नारायणो महापुरुषः पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मनाऽद्यापि
संनिधीयते १४ इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्यस्तत्रापरो निर्विशति भवान्याः शाप
निमित्तज्ञः यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि १५ भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्य
मानो भगवतश्चतुर्मूर्त्तेर्महापुरुषस्य तुरीयां तामसीं मूर्त्तिं प्रकृतिमात्मनः संकर्षणसंज्ञामा
त्मसमाधिरूपेण संनिधाप्यैतदभिगृणन् भव उपधावति १६ श्रीभगवानुवाच ॐ नमो भग
वते महापुरुषाय सर्वगुणसंख्यानायानन्तायाव्यक्ताय नम इति १७ भजे भजन्यारणपादपंकजं भग
स्य कृत्स्नस्य परं परायणं भक्तेष्वलं भावितभूतभावनं भवापहं त्वा भवभावमीश्वरं १८ ॥ ॥ ॥

40

परमीश्वरं भजे इत्यन्वयः अरणं शरणं पादपंकजं यस्य कृत्स्नस्य भगस्य ऐश्वर्यादिषाड्गुण्यस्य परमायतनमाश्रयं भक्तेषु अलमि
त्यर्थं भावितं प्रकटीकृतं भूतभावनं स्वरूपं येन भवापहं संसारहरं भक्तेषु रत्यनुबंधः भवं भावयतीति तथा तं अर्थाद
भक्तेषु रतिर्द्रष्टव्यम् ॥१८॥ ॥ ॥ ॥ ॥ ॥ ॥ शिव०

अयुतं पुरुषमानेन आयुर्वर्षाणि येषां वज्रवद्दृढं संहननं शरीरं तस्मिन् बलं वयो मोदाः तैः प्रमुदितानि यानि महासौरतानि मिथुनानि
तेषां व्यवाय वर्जं संभोगावसाने एकवर्षशेषे आयुषि धृत एको गर्भो यैः तादृशानि कलत्राणि येषां त्रेतायुगसमः विषयसुखोत्
कर्षात् कृतयुगेऽपि सर्वेषां ज्ञाननिष्ठत्वात् द्वापरादौ तु दुःखबहुलात् १२ पत्रकपुष्पैः वुद्धिवर्षे तु देवपतयः स्वैः स्वैः स्वैर्गणनायकैः मुख्यैः
कृतमहार्हपूजाः सन्तः स्वैरं विहरन्तीत्यन्वयः केषु स्थानेषु सर्वर्तुकुसुमस्तबकादीनां श्रिया समृद्धाः सन्तः आनमन्ता

सबुपुरुषा अयुतपुरुषायुषवर्षाणां देवकल्पाणां नागायुतप्राणानां वज्रसंहननबलवयोमोदप्रमुदि
तमहासौरतमिथुनव्यवायापवर्गवर्षधृतैकगर्भकलत्राः यत्र ह वाव कालस्त्रेतायुगसमः कालो वर्त्तते १२ यत्र दे
वपतयः स्वैः स्वैर्गणनायकैर्विहितमहार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलयश्रियानम्यमानविटपल
ताविटपिभिरुपशुम्भमानरुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा चामलजलाशयेषु विकचवि
विधनववनरुहामोदमुदितराजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभिर्मधुकरनिकरा
कृतिभिरुपकूजितेषु जलक्रीडादिभिर्विचित्रविनोदैः सुललितसुरसुन्दरीणां कामकलिलविला
सहासलीलावलोकाकृष्टमनोदृष्टयः स्वैरं विहरन्ति ॥१३

विटपास्तदग्राणि लताश्च येषु तैर्विटपिभिरुपशुम्भमानानि शोभमानानि रुचिराणि काननानि येषु तेष्वाश्रमायतनेषु वर्षगिरि
द्रोणीषु च तथा अमलेषु जलाशयेषु च विकसितानि विविधानि यानि नवानि वनरुहाणि नीरजानि तेषामामोदेन मुदितैः राजहं
सादिभिर्मधुकरनिकराणां च आकृतिभिः ज्ञातिभिर्विशेषैरुपकूजितेषु कामेन कलिलैः दृष्टिभिः विलासादिभिरिताकृ
ष्टं मनो दृष्टिश्च येषां ते ॥१३॥ ॥ ॥ ॥ ॥ ॥ ॥

भा० पं० तत्र जन्मादेरनुत्वं मत्स्यादि द्वारेणाप्र पंचयति यस्य गुणेन नित्यो महत्तामादिगुणः आसीत् विज्ञानं सत्त्वं धिष्ण्यमाश्रयो यस्य सः तस्य चि

टी० न्मयत्वेन सत्त्वप्रधानत्वात् सर्वत्र कलिलाधिदेवो वासुदेवो मद्विवक्षया भगवानजो ... यत्संभवः यस्मात् ... लक्षणः संभूतः अहं

द्रः त्रिवृता त्रिगुणेन स्वतेजसा स्वविभूतिरूपेण अहंकारेण वैकारिकं देवतावर्गं तामसं भूतवर्गं इंद्रियवर्गं च सृजे सृजामि

२२ किंच एते वयं महदादयः सर्वे यस्यानुग्रहादिदं ब्रह्मांडं सृजामः कथंभूताः यस्य महात्मनो वशे स्थिताः संतः यतः सूत्रेण कि

२२ पाशेन यंत्रिताः प्रोताः शकुंताः पक्षिण इव लौकिकेन सूत्रेण वयमित्युक्तं तानेवाह महानहंकारश्च वैकृतादयः दैवोऽकावर्गाश्च

४१

यस्याद्य आसीद्गुणविग्रहो महान्विज्ञानधिष्ण्यो भगवानजः किल यत्संभवोऽहं त्रिवृता स्वतेजसा वै
कारिकं तामसमैंद्रियं सृजे एते वयं यस्य वशे महात्मनः स्थिताः शकुंता इव सूत्रयंत्रिताः महानहं वै
कृततामसेंद्रियाः सृजाम सर्वे यदनुग्रहादिदं २३ यन्निर्मितां कर्ह्यपि कर्मपर्वणीं मायां जनो
ऽयं गुणसर्गमोहितः न वेद निस्तारणयोगमंजसा तस्मै नमस्ते विलयोदयात्मने २४ इति श्री
भागवते महापुराणे पंचमस्कंधे सप्तदशोऽध्यायः १७ ॥ ॥ ॥ ॥ ॥

२३ स्थितिलयहेतुत्वं दर्शयन् प्रणमति यन्निर्मितामेतां मायामेवायं जनोऽजमा वेद न तु निस्तारयोगमुपायं कर्हिचिदपि वेद
ति स्थितिहेतुत्वं दर्शितं कीदृशीं कर्माण्येव पर्वाणि ग्रंथयः तानि वयति प्रापयतीति तथा तां प्रलयहेतुत्वमाह विलीयतेऽस्मि
न्निति विलयः उदेत्यस्मादित्युदयः विलयश्चोदयश्चात्मा स्वरूपं यस्य तस्मै नमः २४ पंचमे सप्तदशोऽध्यायः टीकायां
श्रीव० रामायनमः रामायनमो नमः ॥ ॥ ॥ ॥ ॥ श्रीव०

ईश्वरत्वमुपपादयं त्यामसत्वेन प्रसक्तमनादरं वारयति निरीदमायास्यापि इति मायाजालैर्विषयैश्चित्रवृत्तिभिः करैरौग्र्य मरीव
पिरंषदपि नान्यते न लिप्यते किमर्थं निरीहमायास्य ईशो ईशनाय विमनाय ईशान मीट संपदादि लोभाद्वेषिप अत्रैव धर्म
इत्यान्तः यथा अजितक्रोधवेगा नानो साकं इति ज्यते न तथेति अनतः आत्मन रंद्रियाणि जिगीषुः जेतुमिच्छुर्मुमुक्षुः तं क्रो
नमन्येत नाद्रियेत १८ तत्र हरराम धाम्यां मन्त्रस्य कुनोऽइति नीज्यते तत्राह असमीदृशः इति येन्यतस्य त्वमोप या तीवाप्त
नरव योमपंकरः प्रतिमानिमध्यासवाम्यां आत्माम्रलोचनरवच नागाव धर विमोहनेन तथा प्रतिमानं युक्तमित्याह नेति

न यस्य मायागुणाचित्तवृत्तिभिर्निरीहतो ह्यपि इति ज्यते ईशोऽयथानोऽजितमन्युरंहसां कस्तं
नमन्येत जिजीषुरात्मनः १८ असदृशोपः प्रतिमानिमायया ह्यीवैवमध्यासवताम्रलोचनः नमा
मन्वध्वो हरेण ईशिरे क्रियाय यादयोः स्पर्शनधर्षितेन्द्रियाः २० यमाहुरस्याश्रितिं त्रिजन्मनः
यमंत्रिभिर्विदितेनयमनंतमध्वपः न वेद मित्राः पचमिव कचिदात्सितं मतमंडलं महर्ज सहस्र
धामसु ॥२१

पादार्विंनेपस्य पादयोः स्पर्शनेन धर्षितं मोहितं मोनिद्रियं मनो यासां ताः स्त्रियः ह्लज यादृ भुजाद्य हरणेन ईशिरे न शेकुः कस्तं नम
न्येतेति हर्वेणैवान्वयः अस्य नित्यस्य त्यास्थिति जन्मलंय महेन्द्र यमाहुः अनंतमवं त्रिभिः स्थित्यादिभिर्विहितं अनंतं च यमाहुः अ
वयो मंत्राः छंदोनुरोधेन दीर्घपाठे अकारो द्विवेद वमानानां लंक्ष्मीः याच अपदपद स्वधं अनंतं तत्त्वं दर्शयति महर्जसहस्रमेव धा
मानि स्थानानि तेषु कचिदेकदेशाश्रितं मतमंडलं यो न वेदासि अद्यपि पशमिव तस्मै नमः इति चतुर्थेनान्वयः २१॥ श्री

भा० पं०
टी०

परमेश्वरत्वेन स्तुत्वा प्रस्तुतावतारचरितमाह वेदानिति तमसा दैत्यरूपेण तिरस्कृतान् अपनीतान् नाचनुरंगमस्य नृतुरंगोत्तमाङ्गो विग्रहो यस्य कवये ब्रह्मणे तदर्थं अवितथेहिताय सत्यसंकल्पाय ॥ ७ ॥ अत्र प्रह्लादचरित्रे महापुरुषस्य गुणानां भाजनः आश्रयः दैत्यदानवकुलस्य तीर्थीकरणं शीलमाचरितं च यस्य फलसंकल्पेन व्यवधानशून्यः अन्यः अनन्यः अभिचारी यो भक्तियोगस्तेन उपास्ते तेजसे ॥ तेजसामपि तेजसे आविराविः अतिप्रकटो भव वीप्सा वा कर्माशयान् कर्मवासनाः रन्धय नाशय इति पाठे राजादीन् रंधय ति

वेदान् युगान्ते तमसा तिरस्कृतान् रसातलाद्यो नृतुरंगविग्रहः। प्रत्याददे वै कवयेऽभियाचते तस्मै नमस्तेऽवितथेहिताय इति ॥ ७ ॥ हरिवर्षे चापि भगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनिमित्तमुत्तरत्राभिधास्ये तद्दयितं रूपं महापुरुषगुणभाजनो महाभागवतो दैत्यदानवकुलतीर्थीकरणशीलाचरितः प्रह्लादोऽव्यवधानानन्यभक्तियोगेन सह तद्वर्षपुरुषैरुपास्त इदं चोदाहरति ॥ ७ ॥ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान्रंधय रंधय तमो ग्रस ग्रस ॐ स्वाहा अभयमभयमात्मनि भूयिष्ठाः ॐ क्ष्रौं ॥ स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया ॥ मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी ॥ ८ ॥ ॥

इदं भूतपिशाचाः भयात् विश्वस्य स्वस्त्यस्तु इति प्रार्थने खलस्यापि भवेत् तच्च खलबुद्धौ विनाशे न स्यात् अतो मम मंगलं ध्यायन्तां वा भूतानां मन्योन्य घाते विना न भवेत् इत्याशंक्याह खलः प्रसीदतु क्रौर्यं त्यजतु भूतानि च मिथः शिवमेव ध्यायन्तु तेषां मनश्च भद्रं उपशमादिकं भजतु नोऽस्माकमपि मतिः आविश्यतां भूतानां च मतिः अहैतुकी निष्कामा भवतु ॥ ८ ॥ ॥ ॥ शिव०

४२

८२

अव्यापदशे मनोमेरोः दुर्बोधितक्रमतत्स्विषु त्रिभुवोऽनरवर्गेषु सेवसे वकवलोनं भद्रकालवावर्णयति । तस्य कुलपतयः सेवकान्मव्वा
श्च १ भद्रकालवस उच्चुरिति प्राणान्मत उपदध्यानीतिव कुलल्लदुराप्यानघोगाकुलीषु लिंगसमवादन्यायेन वहुवचनं २ अयंज
तश्चव्रजंमत्तेनिर्हृत्यदग्ध्वाद्ववं तदुभयपथे नेजिजोविषतिजीविनमिछति पाठांतरेन छदः सामंजस्यं किंधमोघवंतप
र्हिपतः अमत्तु छविषपस्वं सेविन्निविक्रमेपापमेव ध्यायन् ३ नन्वविद्वान्न पश्यति किमत्रचित्रमत्राह तस्यैवं

श्रीशुकउवाच तस्याच भद्रकालानामधमेंस्तनस्तनकुले पनकपुलवामद्राग्ध्ववैसाद्ताभदगवतो
वासुदेवस्यप्रियंतनूंध्यमपीरूपशीर्षाभिधा मापरमेस्वसमाधिअसंनिधाच्येदमभिज्वलंत उपधाव
तेघ्नंतत्रनोपंदिशीवन्नपश्यति धापन्नसदार्हिविक्रमेसेविन्निर्हितस्यपुत्रपितरंत्रिजोविभुः इवदंतिवि
श्वंकवपः स्मनस्वरंपश्यंतिचाऽध्यात्मविदोविपश्चितः तथापिसत्वंतितनोऽजमापयासुविस्तितंकु
त्समजंतनोऽस्मितं ४ विश्वोद्भवस्थाननिरोधकर्मते ह्यकर्तुरंगीकृतमप्यपावृतः पुत्रनचित्रंत्व
पिकाय्यकारणे सर्वात्मनिव्यतिरिक्तेचवस्तुतः ॥ ५ ॥

तिस्माच्छास्त्रतः पश्यंतिचसमाधौहेअकृतस्यापिमायामयीति रागञ्चतव कृत्यं चेष्टितं तुविस्मतं मातिचित्रं अतः शास्त्रादिभ्य मं
विशापतंत्वामजंतनोऽस्मि ४ इदमपरं चित्रवत्स्वनोपमानमपि अपिनचित्रमित्याह विश्वोद्भवादिकर्मअकर्तुरपि अपगतो
माव्रतं मावरणं यस्मात् तादृशस्यापि तेअंगीकृतं वेदेनत्वयितत्र चित्रंपतः मायया सर्वात्मनिकार्यस्य कारणेस्वव्यति
कर्मपुत्रं वस्तुतः सर्वव्यतिरिक्तेनिरुपाध्यावनाञ्चनत्वमंकर्तृत्वंचयुक्तं ॥ ५ ॥ " " " "

।भा·पं० टी०

केतुमालेऽपि कामदेवस्वरूपेण आस्ते इति शेषः किमर्थं मास्तेऽत आह लक्ष्म्या इति प्रजापतिः संवत्सरः संवत्सरो वै प्रजापतिरिति श्रुतेः
तस्य दुहितरो रात्र्यभिमानिन्यो देवताः पुत्रा दिवसाभिमानिनो देवताः तेषां च प्रियचिकीर्षया पुरुषायुषा पुरुषस्य वर्षशतेन यान्यहोत्राणि
तैः परिसंख्यानं गणनं यासां षट्त्रिंशत्सहस्राणामित्यर्थः यासां दुहितॄणां महापुरुषस्य महास्त्रं चक्रं तस्य तेजसा ॥१५॥ रमां रमयन्
स्वीयानीन्द्रियाणि रमयते केन साधनेन रमयन् तदाह अतीवसुललितेन या गत्या यो विलासस्तेन विलसितो रुचिरो हासलेशो
मंदस्मितं तेन सहितो योऽवलोकस्तद्वलीलया किंचिदुत्तम्भितं उन्नमितं सुंदरं यद्भ्रूमंडलं तेन सुभगं वदनारविंदं तस्य श्रिया ॥१६॥

४३

केतुमाले भगवान् कामदेवस्वरूपेण लक्ष्म्याः प्रियचिकीर्षया प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषा-
युषाऽहोरात्रपरिसंख्यानानां यासां गर्भा महापुरुषमहास्त्रतेजसोद्विजितमनसां विध्वस्ता व्यसवः संवत्सरान्ते
विनिपतन्ति ॥१५॥ अतीव सुललितगतिविलासविलसितरुचिरहासलेशावलोकलीलया किंचिदुत्तम्भि-
तसुंदरभ्रूमंडलसुभगवदनारविंदश्रिया रमां रमयन्निन्द्रियाणि रमयते ॥१६॥ तद्भगवतो मायामयं रूपं
परमसमाधियोगेन रमा देवी संवत्सरस्य रात्रिषु प्रजापतेर्दुहितृभिरुपेताऽहःसु च तद्भर्तृभिरुपास्ते
इदं चोदाहरति ॥१७॥ ओं ह्रां ह्रीं ह्रूं ओं नमो भगवते हृषीकेशाय सर्वगुणविशेषैर्विलक्षितात्मने आकूतीनां
चित्तीनां चेतसां विशेषाणां चाधिपतये षोडशकलाय छन्दोमयायान्नमयायामृतमयाय सर्वमयाय सह-
से ओजसे बलाय कांताय कामाय नमस्ते उभयत्र भूयात् ॥१८॥ ॥ ॥

43

तद्भर्तृभिः दिवसाभिमानिभिरुपेता ॥१७॥ सर्वैर्गुणविशेषैः प्रेयवत्सूभिर्विलक्षितो लक्षीकृत आत्मा यस्य आकूतीनां क्रियाणां चितीनां ज्ञा-
नानां चेतसां संकल्पाध्यवसायादीनां विशेषाणां तत्तद्विषयाणां षोडशकलाः अंशा एकादशेन्द्रियपंचविषयलक्षणा यस्य छन्दोमयाय वे-
दोक्तकर्मप्राप्याय अन्नमयाय अन्नोपष्टम्भत्वात् अमृतमयाय परमानंदाविष्कारत्वात् सर्वमयाय सर्वविषयत्वात् सहसे उर्जसे बला-

शिव०

न संगः क्वापि मा भूत् यदि कथंचित्स्यात् तर्हि आगारादिषु मा भूत् किंतु भगवत्प्रियेष्वेव आगारादिसंगे दोषमाह य इति इंद्रियप्रियो न तथा सिध्य
ति १० भगवत्प्रियसंगे गुणमाह येषां भगवत्प्रियाणां संगात् लब्धं मुकुंदविक्रमं मुहुः श्रुतिभिः श्रवणादिभिः संस्पृशतां तेषां मानसं
मलं अंतर्गतो ऽजो मानसं मलं हरति कथंभूतं विक्रमं निजमसाधारणं वीर्यवैभवं प्रभावातिशयो यस्य तीर्थं तु गंगादि मुहुः संस्पृशतां अंगजं
मलं केवलं हरति तान् को वै न सेवेत तत्संगमित्यर्थः ११ मानसमलापगमफलमाह यस्येति अकिंचना नास्ति किंचन कामो यस्याः भक्तिर्भव
ति तस्य तत्प्रसादेन सर्वे देवाः सर्वैर्गुणैर्धर्मज्ञानादिभिः सह तत्र सम्यगासते नित्यं वसंति अभक्तस्य तु कुतो महतां
गुणाः ज्ञानवैराग्यादयो भवंति असति विषयसुखे मनोरथेन बहिर्धावतः १२ ननु हरिविमुखे स्वजनादावासक्तस्यापि लोके
महत्त्वं दृश्यते तत्राह हरिरिति पुत्रादिषु सक्तो महान्न भवति निरूपाधिप्रियो भगवानेव आत्मा तं विना जीवना

मागारदारात्मजवित्तबंधुषु संगो यदि स्याद्भगवत्प्रियेषु नः यः प्राणवृत्त्या परितुष्ट आत्मवान् सिध्यत्यदू
रान्न तथेंद्रियप्रियः १० यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हि मानसं हरत्यजोंऽतः श्रुति
भिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमं ११ यस्यास्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ह
रावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः १२ हरिर्हि साक्षाद्भगवान् शरीरिणामात्मा झ
षाणामिव तोयमीप्सितं हित्वा महांस्तं यदि सज्जते गृहे तदा महत्त्वं वयसा दंपतीनां १३ तस्माद्रजोराग
विषादमन्युमानस्पृहाभयदैन्याधिमूलं हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताकुतो
भयमिति १४

भावात् महानिति प्रसिद्धोपि यदि सज्जते गृहे तदा दंपतीनां मिथुनानां क्षुद्रादिस्त्रीपुंसानामिव केवलं वयः कृतं देहस्य महत्त्वं न
तु गुणादीनां मिथुनेषु दंपतीषु वयसा यथा महत्त्वं तथा मिथुनानां महत्त्वं वयसैवेत्यर्थः १३ तस्मादेवं तस्मात्
हित्वाकुतोभयं नृसिंहपादं भजत गृहं त्यक्त्वा रजः कामः रागो ऽभिनिवेशः रजआदीनां मूलं कारणं अनर्गलं
संसृतीनां जन्ममरणादीनां चक्रवालं मंडलमिव चक्रवत्पर्यायेण १४ ॥ ॥ ॥ ॥

भा० पु० टी० ४५

इदानीं कृपां प्रार्थयन्ते सत्त्वमिति यन्मदर्जनं विना न कश्चित्पुरुषार्थः तत्त्वे त्वदिति त्वया यत्कराम्बुजं सात्वतां मन्मानो शीर्ष्णि अधायि कृपया न्यस्तं
तन्ममापि शीर्ष्णि विधेहीति शेषः । कथम्भूतं वन्दितं सर्वैर्नामवर्षित्वेन सन्दिग्धस्तं मञ्च मयि नवा नादरः हे वरेण्य मां वत्सलं लक्ष्म बिभर्षि अत्र
कोऽपि चित्रमेतन्न मयि केवलमादरमात्रं मक्लेशमुन्मूलमकृपामात्रमेवेत्याह तवैव यत् मायया दुर्विज्ञेयं तत्कोऽपि तर्कयितुं समर्थः २३।२४॥
सत्त्वायेति सत्त्वप्रधानाय मत्त्वेन माय प्राणाय परस्मै आत्मने २५ उत्तरत्वेनो वेदात्मको नादो यस्य परं दं बिभ्रन्तं प्राणादिनाम्नः विचिन्ति ये ध्यालंबे
नमस्तेन वशं अन्नं पदं नियमितवान् सत्त्वामि स्वाः । तथा च श्रुतिः तस्य वा कं तिर्न्मात्मानि दामानीति २६ नन्विन्द्रादयो वरुण नयंतिरे

सत्त्वं ममाप्यच्युत शीर्ष्णि वन्दितं कराम्बुजं यत्त्वदधायि सात्वतां बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहित
मूहितुं विभुरिति २३ उग्रसेनेन भगवतः प्रियतमं मात्स्यमवतारस्वरूपं तद्वर्षं पुनः अस्य मनोः प्राक्प्रदर्शितं सरुद
नीमपि महतामक्लियाजेनातथ्य पनीदं चोदाहरति २४ ॐ नमो भगवते मुख्यतमाय नमः सत्त्वाय प्राणायौ
जसे सहसे बलाय महते मत्स्याय नमः इति २५ अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुस्वनः स ई
श्वरः त्वं य इदं वशेन धन्नामानि याद्रवन्मतीनरः । इति २६ यं लोकपालाः किल मत्सरज्वराः हित्वा पतन्तोपि
पृथक्समेत्य च पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपं स्थाणु यदत्र दृश्यते २७

कपालत्वात् कुतोऽस्य तत्राह यमिति मत्सरज्वराः ज्वरो येषां ते यं विशिष्टत्वादिपदश्चतुष्पदः सरीसृपं जंगमं स्थाणुस्थावरं च यदत्र दृश्य
ते तत्किंचिदपि पातुं न शक्ताः सत्त्वादित्वमेव प्राणरूपेण पालक ईश्वरः इत्यर्थः । तथा च श्रुतिः तानहिंसंतासमवस्थानमस्य
हसमवस्थानमस्यादि ॥२७ ॥ " " " " "
श्री शिवं० श्री० शिवं० " . . . " . . " . " . " " शिवं०

44

ल्लकामेनैव लब्धस्य वकलादत्तं हतापौ स्मि अन्यकामान यान्त्वामर्चयतो नयति स्फुरीं मनोरथाः स्फुरीत्याह स्त्रिय इति स्वत एव हृषीकाणामी-
श्वरं पतिं संतं त्वामाराध्य याः स्त्रियोऽन्यं पतिं प्रार्थयंति पतिकामानां हि कामाराधनं ते प्रति तासामपत्यादीनि ते पतयो न पांति यतस्ते अस्वतंत्राः १९ अ-
स्वतंत्र एव भर्तुं वत्याह स वा उत्ति स एवंभूतः पतिः भवानेक एव नान्यो यो भवान् आत्मलाभात्परमन्यदधिकं न मन्यते यत्तु पुनः
न्याधीनस्तु तस्य न स्वतंत्रतेत्यान त्वेवं मंडले श्वराणामिव मिथो भयस्यादित्यर्थः २० किंच निःकामभजनेऽप्रार्थिता एव सर्वे कामा
भवंति सकामभजने तु कामितमात्रं अनित्यं चेत्याह या स्त्री तस्य उरुक्रमस्य ते पादसरोरुहस्यार्हणं पूजां नैव कामयेत् न फलांतरं
साऽखिलेषु कामेषु लंपटा सर्वान्कामान्प्राप्नोतीत्यर्थः ईप्सितमीप्सितो फलांतरमाप्तुमपेक्षितः सन् अर्चितश्चेत्ततः तदेव राति

स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याऽऽराध्य लोके पतिमाशासतेन्यं तासां न ते वै परिपात्यपत्यं प्रियं धनायूंषि
यतोऽस्वतंत्राः १९ स वै पतिः स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं स एक एवेतरथा मिथो भयं नै-
वात्मलाभादधि मन्यते परं २० या तस्य ते पादसरोरुहार्हणं निकामयेत्साऽखिलकामलंपटा तदेव
रासीप्सितमीप्सितोऽर्चितो यद्भग्नयाच्ञो भगवन्प्रतप्यते २१ मत्प्राप्तयेऽजेशसुरासुरादयस्तप्यंत उग्रं
तप ऐंद्रियेधियः ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृदया यतोऽजितः २२ ॥ ॥ ॥

किंच ॥ यद्यतः फलभोगानंतरं भग्नायाच्ञा याचितोऽर्थो यस्याः प्रतप्यते दुःखं प्राप्नोति तदेव तु सिनत्सुनित्यं २१ ननु मम माहिमाऽऽकुतः
सर्वकामप्राप्तिः त्वेवं हि कामार्थिभिः सेव्यसे अत आह मत्प्राप्तये ब्रह्मादयः तपस्तप्यंते कुर्वंति कथंभूताः ऐंद्रियेषु विषयेषु धीर्येषां
अल्पकस्य मासः तथापि भवत्पादपरायणान्ऋते मां न विंदंति मत्कटाक्षविलासिता विभूतीर्भजंते इत्यर्थः यतः त्वय्येव हृ-
दयं यस्याः साऽहं त्वत्परतंत्रत्वात्त्वदनुवर्तिन्येव विलोकयामि नान्यानित्यर्थः ॥२२॥ ॥ ॥

भा० पं०
टि०

इत्युक्त्वा तत्त्वं तेषां कर्म दर्शयति तद्यथेति धर्मौपयिकं धर्मकारणं तमेव त्वामिदं तं धर्ममाहुः साधवः इति तं तं सा
परत्र परलोकार्थं मुदा हरन्ति तद्धर्मं धर्मं कथं न दृष्ट्वा नाग्राः पञ्चेन्द्रियाणां कृतः सकलस्य भवनं सा यावत्
गुणस्य गुणं जानतोऽपि उपभोगः तेन कुनाथस्य कुण्डे अजितात्मनो विलुम्पति यथा चौरः कुपालकस्यानव
हिताऽऽत्मनः सार्थस्य वंकं हरन्तीति तद्वत्

८५

तद्यथा पुरुषस्य धनं यत्किंचित्सादाः धर्मौपयिकं वकुलं कुराधिगतं साधुताः परमपुरुषाः तद्ध
नं लब्ध्वा धनेन धर्मं तत्तु सांपरायं उदाहरन्ति २ तद्धर्म्यं धनं दर्शनस्पर्शेन श्रवणं स्वाद
नाविघ्राणां सकलस्य वेदसाधक कृत्याग्न्योपभोगेन कुनाथस्याऽजितात्मनो यथा सार्थस्य
तथाजितात्मनो विलुम्पति ३ अथ पञ्च पुत्रे कोटं विकोदात् पलादयो नाम्ना कर्मणा कृत
शृगालाः बन्धनेऽपि छत्रोऽपि केदये स्वकुटं विनैव उरगाः कवत् सदैव मांसं मिथ्ये नोक्रयन्ति ४

45

यथा हि नेत्रं ऊषरं कृष्णमाणामप्य दग्धबीजं क्षेत्रे पुनरेवावपनकाले गच्छन्ति णवी
हिन्दिग्नकुरमिव भवति एवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन्नारिककर्माणि पुत्ताः दंतिपद
पंकाम कोर उरगव श्रावस्यः ६

गामावयोगे क्षेत्रे स्येन कथ्यते ३ अथ च वेति श्रयञ्चेस पर्याप्ततोय स्याम कर्मणा कृत कौः शृगालाः कदर्य
त्यक्ति लुब्धस्य कृपणस्य न बीजं नवत्स लगकृत ५ सेत कथ्यते ६ यथा हि तिन दग्धानि बीजानि यात्किं न प
द्यातं तथा धर्मावस्थान श्रीमान्मः एक को मानाकार ३ः यथा कर्त्तर भोजने केऽत्र देवे पिपरीमलो न तीपते
एवमत्र वासना मदीयाः कर्माण्युत्सीदन्ति ममैषः ६ ॥ ॥ ॥ ॥ ॥ शिव०

पातोद्येण वणिक् सार्थकं दृष्ट्वा पर्वेसा आत्मानं विवेकितं मनीषा येव दृष्ट्वा स्वानोपानिंद्रियाणि गोमायुस्पानिपानमपत्यादीनि त्येव कल्पितविषयः अकुत्यन्तस्येनलोकस्य जन्मसमस्य अधिगतो न भवति अथ अतः तदेतदेव भवान्धवत्स्वपसम न वेतानकल्पेन २६ इति पंचमे टीकायां त्र्योदशोऽध्यायः १३ चतुर्दशे भवाटव्या स्वरूपकं यत्कृतं कृता प्रश्नतेतस्यामो भाषुमपराकाष्ठं कल्पनम् १५ः परीक्षितापृष्टः सः कार्तिकेयो चलितस्तत्तोकिः दुरत्यये इवेत्यज यात्रिवेशि तेरतिपथकृतदेवानिवेशनप्रकारकथनं नपंचपति पराप्रतिज्ञो जीवलोकः अपविवेको मायापात्रः स्वर्गतेऽध्वन्या पतितो भवाटवीं गतः सन् कृतिःत्वपस्यत्रेष्ठत्वान्निदेयमध्ये कैतः सेवको

राजोवाच योऽस्तु वा इवकुविदाम स्वभागवनन्तवपाऽभिहितः पातेऽत्येण वचसा जीवलोभवाध्या सह्यार्थमनीषा विदुषा कल्पित विषयोनां जसाऽध्यन्यो लोक समाधिगम अत्र यन्तदेव तद्दुरवगम मम मवेतानकल्पेन निर्दिश्यतामिति २६ इति श्रीभागवते महापुराणे पंचमस्कंधे त्र्योदशोऽध्यायः १३ सकोवाच यत्र बद्धेतात्मानिनांस त्वादिगुणा विशेषविकल्पितकुशला कुशलसमवहारविनि र्मित विविधदेहावलिभिर्वियोगसंयोगाद्यनादिसंसारानुभवस्य द्वारभूतेन षड्इंद्रियवर्गेण तस्मिन्दुर्गाध्ववदसुगमे ध्वन्यापतित ईश्वरस्य भगवतो विष्णोर्वशवर्तिन्या मायया जीवलोकोयं य थावणिक् सार्थोर्थपरः स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरुचरणारविंदमधुकरानुपदवीमव रुंधे यस्यामुह वा एते षड्इंद्रियनामानः कर्मणा दस्यव एव ते १ तद्यथा पुरुषस्य धनं यत्किंचिद्धर्मौपयिकं बहुकृच्छ्राधिगतं साक्षात्परमपुरुषाराधनलक्षणो योऽसौ धर्मस्तं तु साम्पराय उदाहरन्ति तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनावघ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेन कुनाथस्याजितात्मनो यथा सार्थस्य विलुम्पन्ति

भा० पं० केचिद्बुवाल्सोष्ठितेत्याचष्टे केचिदिति व्यालोकंकं तक्ति-कालेप दुजः रागत्वेन त्वदध्यावर्केल द्विजन्यो
टी० तुत्रो मत्ता रव कृत्वपादेजनीमत्तत्समोमपरवातो वजेमा कत्रमति: अनजोमा प्रच द्वीविंदो
स्थिता मर्यादांति कमत्वाहेमत्तो देवताः न जानाति १० अनुया [illegible] पमेवोपादे पत पाग्यल्लानीति प्रकमसाजात्यदु
नश्लोक च न यं पादं प्रथमं व्याचष्टे केचिन्महेदिति केचित्तत्पादकनिभानित्यत्रे भिध्याविषये कुलं पटल
मकं निवासतो पष्ठत्र तदजेन प्रवामउत: श्रुत्वन्वाथितेत्वपिपुनः प्रवृ [illegible]
केचिद्बुवाल्सोपमयादाप्रमदयारोदेमारोपि नत्वकालस
स्याजेनी मत्ता रवावाम मर्यादोरजत्वलाहोदिजदेवता अतिजेत्वलमतिनं विजानाति १० केचि
त्ते कृदवेगनविषयवेतय्य: स्वपं पराभिध्यानेन विभ्रंशितस्मृति त्वयेव मरीचितोपप्रकास्तामे
भिधावति ११ केचिद्कुलकेलिखीत्वनवदति पनबारमनसा दोपंप्रसन्नपरोत्तवाणिपुत्रजकुलमि
मानिनेनाति व्याथितकर्णमूले व्रदय: १२ सपदा दुग्ध्य [illegible] कुंज्वलदाकारिकोकंजउ
घपापेकुमलताविवादयानवदुमपापंमन्त्र द्रविणात्तजोवन्नोतान्त्वपजोवनान्विपमा
ण उपधावति १३॥

जितन्यतूसयोनत्जपंत्वपमेवसकृदवेगनेविषयाणां वैतथ्यविफलत्वं येन पराभिध्यानेन देहाभि
निवेशेनानुविध्वंसितास्मृतिर्यस्य त्वयेवाविभ्रंशितयास्मृत्या तिभंशादेवेस र्थः अद्दप्यभिर्ज्ञात्वानेत्ये
त्यव्याचष्टे केचिद्कुलकेति अतिपन्नचोरमनउन्सात्वेनानोपः सत्रमेप्र थामनवस्येवरीवत्नानजकु
लस्य वानिमानित्वेन अतिव्याथितं कर्णमूले हृदयं च यस्य १२ अपुरपकृतानिल्वेन व्याचष्टे सपदेति
दकपमलदवलकतयेन तत्रकोत्सोविषातिदु: नत्रकरेवापेपुण्ये कुमात्र याविया लतान्कोठिबो

दंशमशकतुल्यैरपसदैर्नीचैः शलभादिभिरुपलभ्यमानः पीड्यमानो बहिःप्राणावितैः पत्यतथावि
धोप्यस्मिन्नध्वनि परिभ्रमन् अविद्यादिभिरुपादेनमनसा गंधर्वपुरतुल्यमघटमानं न लोके सत्य
तया मिथ्यादृष्टिरनुपश्यति प्रपश्यतीति प्रपञ्चस्य चित्तमध्यान्तरं दर्शयति तत्र च गंधर्वपुरे कचिदातपो
दकम् जलं स्मा जलं तत्तुल्यान् विषयान् उपधावतीति कचित्काचिद्वाग्निरपोलूकगतानि लेत्तच्छा
चष्टे। कचिच्छात्रिणालंदोषारांगानि यदनस्यानं पुरीषविशेषं अग्नेर्निष्ठानस्य पुरीषस्य बलोलित्वाविर्लोप
स्परजोगतत्वतेन निर्मितात तद्विषयामतिर्यस्यसः

तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभशकुन्तनस्करमूषकादिभिरुपलभ्यमानबहिः
बहिःप्राणः कचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभिरुपरक्ते मनसानुपपन्नार्थं
नरलोकं गंधर्वनगरमुपपन्नमितिमिथ्यादृष्टिरनुपश्यति ७ कचिदातपोदकनिभान्विषयान्
उपधावति पानभोजनव्यवायादिव्यसनलोलुपः ८ कचिच्चाशेषदोषनिषदनं पुरीषविशेषं
तद्वर्णगुणनिर्मितमतिः स्वर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचं टेट्यकद
चिन्निवासपानीद्रविणाद्यनेकात्मोपजीवनाभिनिवेशं एतस्यां संसाराटव्यामितस्ततः परिधा
वति १०॥

स्वर्णमुपादातुमिच्छति अग्निकामेन कातरः परवशः उल्मुकमसहमानो पिशाचमिव नीतानुरोधलौप
नेन वत्सात्त्वस्य मानं ततस्ततो धावनम् उल्मुकपिशाचमग्निबुद्ध्यानुधावतिनतत्प्राप्नोति कचित्
इति तर्पितेनमतिनः स्वनुष्ठितेनैव स्वर्णमनुधावन्नपीत्यर्थः निवासतोयद्रविणस्येत चाचष्टे अत्र
ति निवासादिष्वनेकात्मनः उपजीवनाभिनिवेशोयस्यसः १० ॥ ॥ ॥ ॥ ॥

सं० पं० टि०

चलन कश्चिदित्येतद्व्याचष्टे कश्चित्कुतश्चमेधाः कर्मचोदनात्तातामानिमतोनिविशन्तः मरगिरीसमाप्त कुन्तदंते जलमिश्चनेन १९ पदे पदे स्वनन्तं वह्निनेतिव्याचष्टे कश्चिद्बहुःसहनेति २० कश्चिन्निगीर्णं इत्येतद्व्याचष्टे सरोवीतिरा दृष्टः स्मशेते इति व्याचष्टे कदाचिदिति मानोगजैरेवं दंष्ट्रापरपीडकाल्लोन् भग्नमानं दंष्ट्रापस्य नानरा वनलब्धो विद्रापाः सतोपि चेन २२

कश्चित्कुतश्चमकर्माचोदनः निभरगिरीमानतः समालोलोकव्यसनं कण्टितमनाः कंटकशाकैरादेवं प्रविशान्निवसीदति १९ कश्चिद्बहुःसहनेन कोपाभ्यन्तरं वह्निनागतो नमाः स्वकुटं वा पकृत्यति २० सरवपुनर्मिद्रजगदगृहितो येनमग्नविमग्नः स्वस्वारल्पं रुवशेते सौख्यं किं चनैवं दशावद्वापवित्रः २१ कदाचिन्मद्गमानं दंष्ट्रोद्गजैर्दमरकैरलब्धनिःशतगो व्याधितेः दंदपेना इतीपमशाविता नोघकूपं धवत्यसति २२ कर्हिचित्कामसमधुलवान्विचिन्वन् यदापरदारं परद्रव्याण्यवरुध्यानो ततो स्वामिभिर्वा निहतः पतत्यपारे निरये २३ अथ च तस्मादुभयथापि हि कर्माण्यस्मिन्नात्मनः संसारावपनमुदाहरति २४ मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति तस्मादपि विष्णुमित्र इत्यनवस्थितिः २५॥

कर्हिचिच्चेतरहस्यानित्येतद्व्याचष्टे कर्हिस्मकामसमधुलवानिति यदाति कुतो वाति तदामयारवनिरपेपतति २३ अथ च तस्मादिति त्रयं कर्मणः संसारहेतुत्वं स्फुरयति अथ च तस्मादेव यस्मात्समनन्तरमेव उभयथापि ह्युक्तं वपनं चैत्रामित्रं न त्वप्यकर्मणः संसारहेतुत्वं स्फुरयति स्वस्याव्यात्स्वपनं जनादेतत्कर्माणि हरंति २४ यत्रातिकष्टप्रतिलब्धमानं इत्येतद्व्याचष्टे मुक्त इति यदि बन्धानुक्तो भवति तदा तत्सकाशाद्देवो हरति तत्काप्यत्रः नवस्थो मुलमतव्रसर्परः शिव०

कुत्रचिद्दिनोपायः सलिलरहितेन ध्यायच्छे एकदा कोचित्स्खलतां प्रसंगान्निकृता वंचिता मतिर्यस्य सः निर्हृदकनदीगर्त्तेषु
ते यथा सघः शिरः स्फुटति यथा इपि च तच्छेदनोऽन्वर्त्तनेन रावमित्रपात्रे चदुःखेद १४ परस्परं वाल्लभ्येनानिर्ग्रंथ रसेतेव्या च
च्छे पदात्विनि स्त्रियः स्त्रीजनोपमतिर्नोपतिष्ठति पितृपुत्राणां वार्द्धिः कुशः तदतः पितृपुत्राणां कुशादि न्कलमात्र
मपि पेशु पश्यति नान्भक्षपति बाध्यन्त इत्यर्थः पितृपुत्रवार्द्धिष्यति तिन्न पाठ स्फुगमः १५ स्त्रीलाघं दावमिलतं व्याव
च्छे कचिद्दासाघोति १६ कोंचपक्षे हीनालहरीसेतव्यावच्छे कचित्कालेन विभमितं प्रतिकुलतां नीतं पद्मान्कुलं तदेवर

धनोऽपि दुःखेदं प्राप्तं उमभिधाति
एकदाऽसत्प्रसंगान्निकृतमतिर्बुदककोतस्खलनवदुभयतोऽपि दुःखेदं पितृपुत्रवार्द्धिष्यमः पितृपुत्रान्वासत्वे
१४ यदानुपावाधवांऽध्ये स्त्रीत्मनेनोपनमतिनदालिपितृपुत्रवार्द्धि शोकाग्निनादह्यमानोमः
लुभतपति १५ कचिदासाघज्जहंदाववन्त्र प्रिपार्थविधुरं सारखोदकं
शंतनिर्वेदमुपगच्छति १६ कचित्कालविभमितराजकुलेतेमात्पद्भ्रनेपिपतनमथनोरः प्रम
तकरवेविगनजीवलदंणस्त्रीति १७ कदाचिन्मनोरथोपगतेनपितृचितामताघसन्संदि
ति स्वप्ननिर्वृतिलतणमनुभवति १८ ॥

दुःखेन स्वपत्नाप्रियतनभजनहृया स्वलबोल व्यविजनानिजीवलतणानिर्दर्शातिनीवस्व स्फुरैर्दतवरस्य
नेनैव व्याख्यातं १७ कचिद्वजंघवंपुरं प्रविचष्ट रव्येनव्याच्छे कदाचिन्मनोरथपद्मान्चित्राघसहैवस
नरतिमना पर्वंजं च वंपुरवद्वयटमानदर्शनमुकंरदानीतस्मिन्नि स्कन्धोमलिहन्यानरतिभेदः १८ ॥